Shri Raghunath Temple MSS. Library,
JAMMU

No. ४३८६

Title सांख्यतत्व कौमुदी

Author श्री वाचस्पति मिश्र

Extent ४५ Age ×

Subject सांख्य

सांख्यतत्त्वकौमुदी

४३८६

F. 45 4386

ॐ क्रं विमितिचस्यानेसर्वतश्चोऽईमत्यपि सर्वस्य मन्मनाश्चैव लघुगीताप्रकी
र्तिता ॥२॥

कपिलायेत्यादौ क्रियार्थोपपदस्य च कर्मणि स्थानिनः इति सूत्रेण चतुर्थी
कपिलमनुकूलयितुं नामजो नमः २ ... यथा स्वयंभुवे नमस्कृत्वेति अजो ह्येको जुषमाणोऽनुशेते २

ॐनमो गुरवे श्रीगणेशाय नमः ॐ कपिलाय नमः अजामेकां लोहितशु
क्लकृष्णां बह्वीः प्रजाः सृजमानां नमामः अजा ये तां जुषमाणां भजन्ते जहत्येनां
भुक्तभोगां नुमस्तान् १ कपिलाय महामुनये मुनये शिष्याय तस्य चासुरये प
ञ्चशिखाय तथेश्वरकृष्णायैते नमस्यामः २ इह खलु प्रतिपित्सितमर्थं प्रतिपाद
यन्प्रतिपादयितावधेयवचनो भवति प्रेक्षावतां अप्रतिपित्सितं तु प्रतिपाद
यन्नायं लौकिको नापि परीक्षक इति प्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत सर्वेषां प्रति
पित्सितोऽर्थो यो ज्ञातः सन्परमपुरुषार्थाय कल्पत इति प्रारिप्सितशास्त्रविषयज्ञा
नस्य परमपुरुषार्थसाधनहेतुत्वात्तद्विषयजिज्ञासामवतारयति दुःखत्रयाऽ
भिघाताज्जिज्ञासा तदपघातके हेतौ दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् १
एवं हि न शास्त्रविषयो जिज्ञास्येत यदि दुःखं नाम जगति न स्यात् सद्वा न जिहासितम् जि
हासितं वा न शक्यसमुच्छेदम् अशक्यसमुच्छेदता चास्य द्वेधा दुःखस्य नित्यत्वाद्वा तदुच्छेदोपा
यापरिज्ञानाद्वा शक्यसमुच्छेदत्वेपि च शास्त्रविषयज्ञानस्यातदुपायत्वाद्वा सुकरो
पायान्तरस्य सद्भावाद्वा तत्र न तावद्दुःखं नास्ति नाप्यजिहासितमित्युक्तं दुःखत्रया १
भिघातादिति दुःखानां त्रयं दुःखत्रयं तत्खल्वाध्यात्मिकमाधिभौतिकमाधि
दैविकं चेति तत्राध्यात्मिकं द्विविधं शारीरं मानसं च शारीरं वातपित्तश्लेष्मणां वैष

... नो दुःखस्य निवृत्तस्य पुनरनुत्पाद ... इत्यर्थः

म्यनिमित्तं मानसं कामक्रोधलोभमोहेर्ष्याविषादविषयविशेषादर्शननिबंधनं
सर्वं चैतदांतरोपायसाध्यत्वादाध्यात्मिकं दुःखं बाह्योपायसाध्यं च दुःखं द्विधा
आधिभौतिकमाधिदैविकं च तत्राधिभौतिकं मानुषपशुमृगपक्षिसरीसृपस्था
वरनिमित्तं आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबंधनं तदेतत्प्रत्या
त्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यं प्रत्याख्यातुं तदनेन दुःखत्रयेणांतःकर
णवर्तिना प्रतिकूलवेदनीयतया चेतनाशक्तेरभिसंबंधोऽभिघातः एतावतैव प्रति
नी कूलवेदनीयत्वं जिज्ञासाहेतुरुक्तः [illegible]।
[illegible] यद्यपि न सन्निरोद्धुं दुःखं तथापि।
तदभिभवः शक्यः कर्तुमित्युपरिष्टादुपपादयिष्यते तथा चोपपन्नं तदप। सर्वनाम्नाप्युक्त
घातके हेताविति तस्य दुःखत्रयस्यापघातकस्तदपघातकः उपसर्जनस्या त्वेनः प्रधानपरा
अन्यथा तच्छेदेन दुःखत्रयाभिघा पि बुद्ध्या सन्निकृष्टस्य तदा परामर्शः अपघातकश्च हेतुः शास्त्रव्युत्पाद्यो नान्य इत्य मर्शित्वात्
तपद पूर्वोऽस्या र्थः तत्राशंकते दृष्टे सापार्था चेदिति अयमर्थः अस्तु दुःखत्रयं जिहासितं च तद्भ
तू नाम वतु भवतु च तच्छक्यहानं सहतां च शास्त्रगम्य उपायस्तदुच्छेदे तथाप्यत्र जि।
ज्ञासा प्रेक्षावतामयुक्ता दृष्टस्यैवोपायस्य तदुच्छेदकस्य सुकरस्य विद्यमान
त्वात् [illegible] तथा च लौकिकानामाभाणकः अर्के चेन्मधु विंदेत किम।

तत्त्वज्ञानस्य त्वनेकजन्माभ्यासपरंपरया साध्यतया चिरकालत्वात् ... ग्रहकोला २

सां॰
ख्ये॰
२

र्थं पर्वतं व्रजेत् इष्टार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत् इति संति चोपायाः श
तशः शारीरदुःखप्रतीकाराय भिषग्वरैरुपदिष्टाः मानसस्यापि ताप
स्य प्रतीकाराय मनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालंकारादिविषयसंप्राप्ति
रुपायः सुकरः एवमाधिभौतिकस्यापि दुःखस्य नीतिशास्त्राभ्यासकुशलतानि
रतिशयस्थानाध्यासनादिः प्रतीकारहेतुरीषत्करः तथाधिदैविकस्यापि दुः
बधा४६ खस्य मणिमंत्रौषधाद्युपयोगः सुकरः प्रतीकारोपाय इति निराकरोति नेति कुतः
एकांतात्यंततोऽभावात् एकांतो दुःखनिवृत्तेरवश्यंभावः अत्यंतो दुःखस्य निवृ
त्तस्य पुनरनुत्पादः तयोरेकांतात्यंतयोरभावात् एकांतात्यंतत इति षष्ठीद्विवचन
स्थाने सार्वविभक्तिकस्तसिल् एतदुक्तं भवति यथाविधि रसायनकामिनी
नीतिशास्त्राभ्यासमणिमंत्राद्युपायोपयोगेपि तस्य तस्याध्यात्मिकादेर्दुःख।
।२ स्य निवृत्तेरदर्शनात् अनैकांतिकत्वं निवृत्तस्यापि पुनरुत्पत्तिदर्शनादनात्यंति
कत्वमिति सुकरोप्येकांतिकात्यंतिकदुःखनिवृत्तेर्न दृष्ट उपाय इति नापार्थि चापिनार्थी
जिज्ञासेत्यर्थः यद्यपि दुःखममंगलं तथापि तदपघातो मांगल्यमेवेति यु
क्तं शास्त्रादौ तत्संकीर्तनं स्यादेतत् माभूद्दृष्ट उपायो वैदिकस्तु ज्योतिष्टोमा
दिः सहस्रसंवत्सरपर्यंतः कर्मकलापः तापत्रयमेकांतमत्यंतं चापनेष्यति

~~...र्गकामो यजेतेति...~~

सं मिश्रं

मेन

ज्योतिष्टो स्वर्गकामो यजेतेति स्वर्गश्च यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभिलाषो
पनीतं च तत्सुखं स्वः पदास्पदमिति दुःखविरोधी सुखविशेषः स्वर्गः स च स्वसत्तया स
मूलघातमपहंति दुःखं नैव पततयां तथा हि श्रूयते अपाम सोमममृता अभूमेति त
त्तत्ये कुतोस्यामृतत्वसंभवः तस्माद्दृष्टिकस्येवोपायस्य तापत्रयप्रतीकारहेतोर्दृष्ट
त्रैयामाह्नोरात्रमाससंवत्सरादिनिर्वर्तनीयतयानेकजन्मपरंपरायाससंपादनीयादि
वेकज्ञानादीषकरत्वात्पुनरप्यपायो जिहासितस्याणक्याह ॥ दृष्टवदानुश्रविकः स
ह्यविशुद्धिक्षयातिशययुक्तः तद्विपरीतः श्रेयान्व्यक्ताव्यक्तज्ञविज्ञानात् ॥२ गुरु
मुखादनुश्रूयत इत्यनुश्रवो वेदः एतदुक्तं भवति। श्रूयत एव परं न तु केन चित् क्रि
\+ अनुश्रवो वेदः यत इति। तत्र भव आनुश्रविकः तत्र प्राप्तो ज्ञात इति यावत् आनुश्रविकोपि कर्म
कलापो दृष्टेन तुल्यो वर्तत इति शेषः एकांतात्यंतिकदुःखप्रतीकारानुपायत्वस्योभय
त्रापि तुल्यत्वात् यद्यपि चानुश्रविक इति सामान्याभिधानं तथापि कर्मकलापाभिप्रा वेदे =
येण द्रष्टव्यः विवेकज्ञानस्यापि आनुश्रविकत्वात् तथा च श्रूयते = आत्मा
द्रष्टव्यः वारे मंतव्यः प्रकृतितो विवेक्तव्यो न स पुनरावर्तत इति अत्र सामान्यतो हेतुमा
श्रोतव्यो ह स ह्यविशुद्धिक्षयातिशययुक्तः अविशुद्धिः सोमादियागस्य पशुबीजादिवध
साधनता यथाह भगवान्पंचशिखाचार्यः स्वल्पः संकरः सपरिहारः सप्रत्यवमर्ष

स्यात्

^ तन्यवनमुगा स हि प्रभुतया सत्ववर्तितद निस प्रत्यवमर्षः ५

ॐ सौको ५ ३

इति खल्वसंकरो हि ज्योतिष्टोमादिजन्मनः प्रधानापूर्वस्य पशुहिंसादिजन्मनानर्थहे
तुनापूर्वेण । स परिहारः क्रियतामपि प्रायश्चित्तेन परिहर्तुं शक्यः । स्वयं प्रमादतः प्रा
यश्चित्तमपि न आचरितं प्रधानकर्मविपाकसमये च पच्यते । तथापि यावदसावनर्थ
प्रसूतं तावत्स प्रत्यवमर्षः । श्रूयते हि पुण्यभारोपनीतस्य स्वर्गधाममहादुःखदावाग्निः
कृपालाः पापमात्रोपपादितां दुःखवह्निकणिकां । न चैनं न हिंस्यात्सर्वा भूतानीति सा
मान्यशास्त्रं विशेषशास्त्रेणाग्नीषोमीयं पशुमालभेतेत्यनेन बाध्यत इति युक्तं । वि
रोधाभावात् । विरोधे हि तुल्यबलसाद्दुर्बलं बाध्यते । न चास्ति विरोधः भिन्नविषयत्वात्
तथा च न हिंस्यादिति निषेधे न हिंसाया अनर्थहेतुभावो ज्ञाप्यते न त्वक्रत्वर्थत्व
मपि । न चानर्थहेतुत्वक्रत्वर्थत्वयोः कश्चिद्विरोधोऽस्ति । हिंसा हि पुरुषस्य प्रत्यवा
यं वक्ष्यति क्रतोश्चोपकरिष्यतीति । तथाभिप्रायो वा फलममतावत्प्रत्युपाये उपयद्विनो
त्वयत्वं चस्य गादि सत्वे सति कार्यत्वादनुमितमिति ज्योतिष्टोमादयः स्वर्गमात्र ।
साधनं । वाजपेयादयस्तु स्वाराज्यसंपत्तिप्राययुक्तास्तु सुकं परसंपदुत्कर्षो हि
हीनसंपदं उरुषदुःखाकरोति । अपाम सोममममृता अभूमेति चामृतत्वाभिधानं चि
रस्थायिमानमुपलक्षयति । यदाहुः आभूतसंप्लवस्थानममृतत्वं हि भाष्यते इति
अतएव श्रुतयः न कर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः परेण
नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्तीति । तथा कर्मणा मृत्युमृषयो निषेदुः

वृ

क्रतूपकार त्वयोः

3/4

ह्यमीषामोक्षप्रभुमारमेनिलम्नगि वस्तुहिंसायाः कौशलमतिविद्वलानि तत्कर्तृहि अमावसमानामानातिक्रम स्वेप्रमाणात ॥

प्रज्ञावंतोऽत्रविपणमीहमानाः अथापरे ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशु
रिति तदेतत्सर्वमभिप्रेत्याह तद्विपरीतः श्रेयान् तस्माद्दानुश्रविकात् दुःखोपघा
तकोपायात्सोमयागादेरविशुद्धादनित्यसातिशयफलाद्विपरीतो विशुद्धो हिंसादि
संकराभावान्नित्यनिरतिशयफलो सकृदपुनरावृत्तिश्रुतेः न च कार्यत्वे नानित्यता
फलस्य युक्ता भावरूपस्य कार्यस्य तथाभावात् दुःखप्रध्वंसस्य तु कार्यस्यापि त
द्विपरीत्यात् न च दुःखांतरोत्पादः कारणप्रवृत्तौ कार्योत्पादात् विवेकज्ञानो
पजननपर्यंतत्वाच्च कारणप्रवृत्तेः एतच्चोपरिष्टादुपपादयिष्यते अत्तराधेय
तस्माद्दानुश्राविकाद्दुःखोपघातकाद्धेतोर्विपरीतः सत्त्वपुरुषान्यताप्रत्ययः सो
त्मात्कारो दुःखोपघातको हेतुरत एव श्रेयान् आनुश्रविको हि वेदविहितत्वा
न्मात्रयाद्दुःखोपघातकत्वाच्च प्रशस्यः सत्त्वपुरुषान्यताप्रत्ययोऽपि प्रशस्यः तद
नयोः प्रशस्ययोर्मध्ये सत्त्वपुरुषान्यताप्रत्ययः श्रेयान् प्रशस्यतरः कुतः पुनर
स्योत्पत्तिरित्यत उक्तं व्यक्ताव्यक्तज्ञविज्ञानात् व्यक्तं चाव्यक्तं च ज्ञश्च व्यक्ताव्यक्त
ज्ञास्तेषां ज्ञानं विवेकेन ज्ञानं व्यक्तज्ञानपूर्वकमव्यक्तस्य तत्कारणस्य ज्ञानं तु यो
ऽपुरार्थेनात्मा परो ज्ञायत इति ज्ञानक्रमेणाभिधानं एतदुक्तं भवति श्रुतिस्मृ
तीतिहासपुराणेभ्यो व्यक्तादीन्विवेकेन श्रुत्वा शास्त्रयुक्त्या च व्यवस्थाप्य दीर्घका
लादरनैरंतर्यसत्कारसेविताद्भावनामयाद्विज्ञानादिति तथा च वक्ष्यति एवं तत्त्वाः

तत्त्वज्ञानस्य

२

सां॰ त॰ ५

भ्यासान्नास्मि न मे नाहमित्यपरिशेषं अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानमिति
२ तदेवं शास्त्रावदपेक्षितार्थत्वेन शास्त्रारंभं समाधाय शास्त्रमारभमाणः श्रोतृबु
द्धिसमाधानाय तदर्थं संक्षेपतः प्रतिजानीते मूलप्रकृतिरविकृतिर्महदाद्याः प्र
कृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ३ संक्षेपतो हि
शास्त्रार्थस्य चतस्रो विधाः कश्चिदर्थः प्रकृतिरेव कश्चिदर्थो विकृतिरेव कश्चित्प्र
कृतिविकृतिः कश्चिन्नोभयरूप इति तत्र का प्रकृतिरेवेत्यत उक्तं मूलप्रकृतिरवि
कृतिः प्रकरोतीति प्रकृतिः प्रधानं सत्त्वरजस्तमसां साम्यावस्था साऽविकृतिः प्र
कृतिरेवेत्यर्थः कस्मादित्यत उक्तं मूलेति मूलं चासौ प्रकृतिश्च मूलप्रकृतिः विश्व
स्य कार्यकलापस्य सा मूलं न त्वस्या मूलांतरमस्ति अनवस्थाप्रसंगात् न चानव
स्थायां मानमस्ति प्रमाणमिति भावः कतमाः प्रकृतिविकृतयः कियत्यश्चेत्यत उक्तं ।
महदाद्याः प्रकृतिविकृतयः सप्त प्रकृतयश्च ता विकृतयश्च प्रकृतिविकृतयः स
प्तेति तथा हि महत्तत्त्वमहंकारस्य प्रकृतिः विकृतिश्च मूलप्रकृतेः एवमहंका
रतत्त्वं तन्मात्राणामिंद्रियाणां च प्रकृतिर्विकृतिश्च महतः एवं पंचतन्मात्राणि त
त्त्वानि भूतानामाकाशादीनां प्रकृतयो विकृतयश्चाहंकारस्य अथ का विकृतिरेव
कियती चेत्यत उक्तं षोडशकस्तु विकार इति षोडशसंख्यापरिमितो गणः षोड
शकः तुशब्दोऽवधारणे भिन्नक्रमः पंचभूतान्येकादशेंद्रियाणीति षोडशको गण

ॐ

तत्वं [illegible] चषष्टत्यादिचतुर्विंशतितमतत्वं

एतेविकार एव न प्रकृतिरिति यद्यपि पृथिव्यादीनाम पि गोघटवृक्षादयो विकारा
एवं तद्विकारभेदानां पयोबीजादीनां दध्यङ्कुरादयस्तथापि गवादयो बीजादयो वा न
पृथिव्यादिभ्यस्तत्वान्तरं तत्वान्तरोपादानत्वञ्च प्रकृतित्वमिहाभिप्रेतमिति न दोषः स
र्वेषां गोघटादीनां स्थूलतेन्द्रियग्राह्यता च समेति न तत्वान्तरत्वं अनुभयरूपमुक्तं त यदप्येषुभय रूपमुक्तं तदाह =
दाह न प्रकृतिर्न विकृतिः पुरुष इति एतच्च सर्वमुपरिष्टादुपपादयिष्यते दृष्टमनुमा
नमाप्तवचनञ्च सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणा
^४ द्धि तमिममर्थं प्रामाणिकं कर्तुमभिमताः प्रमाणभेदा लक्षणीयाः न च सामान्य
लक्षणमन्तरेण शक्यं विशेषलक्षणं कर्तुमिति प्रमाणसामान्यं तावल्लक्षयति प्रमीयतेनेनेति प्रमाणम्
प्रमाणमिष्टमिति अत्र च प्रमाणमिति समाख्या लक्ष्यपदं तन्निर्वचनं लक्षणं प्र
मीयतेनेनेति निर्वचनात्प्रमां प्रति करणत्वं गम्यते असन्दिग्धाविपरीतानधिगत
चित्त विषयाचित्तवृत्तिर्बोधश्च पौरुषेयः फलं प्रमा तत्साधनं प्रमाणमिति एतेन संशयवि
पर्ययस्मृतिसाधनेष्वप्रमाणेषु प्रसङ्गः संख्याविप्रतिपत्तिं निराकरोति त्रिविधमि
ति त्रिसंविधाय स्य प्रमाणे सामान्य स्येति त्रिविधं न न्यूनं नाप्यधिकमित्यर्थः
विशेषलक्षणानन्तरं चैतदुपपादयिष्यते कतमा सा त्रिसंविधा इत्यत आह
दृष्टमनुमानमाप्तवचनञ्चेति एतच्च लौकिकप्रमाणाभिप्रायं लोकव्युत्पादनार्थ
त्वाच्छास्त्रस्य तस्यैवात्राधिकारात् आर्षं विज्ञानं योगिनां न लोकव्युत्पादनायाल

योगिप्रत्यं ते

^ तदधीनत्वाच्चानुमानादीनां सर्व ७

ॐ सांख्य ५६

मिति सिद्धं पिनामिहितं अनधिकारात् स्यादेतत् माभूदूनमधिकं तु कस्मान्न भ
वतीति संगिरन्ते हि प्रमाणवादिन उपमानादीन्यपि प्रमाणानीत्यत आह । सर्वप्रमा
णसिद्धत्वादिति एष्वेव दृष्टानुमानाप्तवचनेषु सर्वेषां प्रमाणानां सिद्धत्वात् अं
तर्भावादित्यर्थः एतच्चोपपादयिष्यत इत्युक्तो अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं
कस्मात्प्रमाणं सामान्यतो विशेषतश्च लक्षयतीति शंकायामाह प्रमेयसिद्धिः १८
प्रमाणाद्धीति सिद्धिः प्रतीतिः सेयमार्यायोऽर्थक्रमानुरोधेन पा क्रमेनानादृत्यैव ।
प्रमाण व्याख्याता ध संप्रति विशेषलक्षणावसरे प्रत्यक्षस्य प्रमाणेषु ज्येष्ठत्वाद्वादिना म
मविप्रतिपत्तेश्च तदेव लक्षयति ॥ प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमान
माख्यातं तल्लिंगलिंगिपूर्वकमाप्तश्रुतिराप्तवचनं तु ५ अत्र दृष्टमिति लक्ष्यनि
र्देशः परिशिष्टं लक्षणं समानासमानजातीयव्यवच्छेदो लक्षणार्थः अवय
वार्थस्तु विषिण्वन्ति विषयिणमनुबध्नन्ति स्वेन रूपेण निरूपणीयं कुर्वन्तीति
यावत् विषयाः पृथिव्यादयः सुखादयश्चास्मदादीनामविषयाश्च तन्मा
त्रलक्षणा योगिनामूर्ध्वस्रोतसां च विषयाः विषयं विषयं प्रति वर्तत इति प्रति
विषयमिन्द्रियं वृत्तिश्च सन्निकर्षः अर्थसन्निकृष्टमित्यर्थः तस्मिन्नध्यवसा
यस्तदाश्रित इत्यर्थः अध्यवसायश्च बुद्धिव्यापारो ज्ञानं उपात्तवि

समानजातीया अनुमानस्मृत्यादयः असमानजातीयः संशयविपर्ययादयो घटपटादि सर्वोपि

याणामिंद्रियाणां वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः सत्वसमुद्रेकः सोध्यवसाय इति च वृ
त्तिरिति च ज्ञानमिति चाख्यायते इदं तत्प्रमाणमनेन यश्चेतनाशक्तेरनुग्रहस्तत्फलं प्र
मा बोधः बुद्धिसत्वं हि प्राकृतत्वादचेतनमिति तदीयोध्यवसायोप्यचेतनो घटादिवत् एवं
बुद्धिसत्वस्य सुखादयोपि परिणामभेदा अचेतनाः पुरुषस्तु सुखाद्यननुषंगी चेतनः सो
यं बुद्धिसत्ववर्तिना ज्ञानसुखादिना तत्प्रतिबिंबितस्तच्छायापत्त्यामनुकरोदरे शरीर।
शरीरं
वत् ज्ञानसुखादिमानिव भवतीति चेतनोनेनानुगृह्यते चितिच्छायापत्त्या चेतना
पि बुद्धिस्तदध्यवसायोप्यचेतनश्चेतन इव भवतीति तथा च वक्ष्यति तस्मात्तत्संयो
गादचेतनं चेतनावदिव लिंगं गुणकर्तृत्वेपि तथा कर्तेव भवत्युदासीन इति अत्राध्य
वसायग्रहणेन संशयं व्यवच्छिनत्ति संशयस्यानवस्थितग्रहणेनानिश्चितरूपत्वा
त् निश्चयोध्यवसाय इति चानर्थांतरं विषयग्रहणेन चासद्विषयं विपर्ययमपाक
रोति प्रतिग्रहणेन चेंद्रियार्थसन्निकर्षसूचनादनुमानस्मृत्यादयो व्यावृत्ता भव
ति तदेवं समानासमानजातीयव्यवच्छेदकत्वात्प्रतिविषयाध्यवसाय इति दृष्टस्य
संपूर्णं लक्षणं तंत्रांतरे तार्किकाणां लक्षणांतराणि तु न दूषितानि विस्तरभया ता
दिति नानुमानं प्रमाणमिति वदता लोकायतिकेनाप्रतिपन्नः संदिग्धो विपर्य
स्तो वा पुरुषः कथं प्रतिपद्येत न च पुरुषांतरगता अज्ञानसंदेहविपर्ययाः श

क्यासर्वोगृह्याप्रतिपत्तुंप्रमत्तेन, नापिमानांतरेणानभ्युपगमात् अनवधृताज्ञा
नसंदेहविपर्यासस्तुयंकंचनपुरुषंप्रतिपद्यमानोनवधेयवचनोभवति अनवधेय
वचनतयाप्रेक्षावद्भिरुन्मत्तवदुपेक्ष्येत तदनेनाज्ञानादयःपरपुरुषवर्त्तिनोभिप्रा
यभेदाद्वचनभेदाद्वालिंगादनुमातव्या इत्यकामेनाप्यनुमानप्रमाणमभ्युपेयं
तत्रप्रत्यक्षकार्यत्वादनुमानंप्रत्यक्षानंतरंलक्षणीयं तत्रापिसामान्यलक्षणपू
र्वकत्वाद्विशेषलक्षणस्यानुमानसामान्यंतावल्लक्षयति तल्लिंगलिंगिपू
र्वकमिति लिंगंव्याप्यंलिंगिव्यापकं शंकितसमारोपितोपाधिनिराकरणेनवस्तु
स्वभावप्रतिबद्धंव्याप्यं येनचप्रतिबद्धंतद्व्यापकं लिंगलिंगिग्रहणेनचविषयवा
चिनाविषयिणंप्रत्ययमुपलक्षयति धूमादिर्व्याप्योवह्न्यादिर्व्यापकःइतियःप्रत्य
यस्तत्पूर्वकं लिंगिग्रहणंचावर्त्तनीयं तेनलिंगमस्यास्तीतिपक्षधर्मताज्ञानम
पिदर्शितंभवति तस्माद्व्याप्यव्यापकभावपक्षधर्मताज्ञानपूर्वकमनुमानमित्यनु
मानसामान्यंलक्षितं अनुमानविशेषान्तंत्रांतरलक्षितानभिमतान्स्मारयति
त्रिविधमनुमानमाख्यातमिति तदिति तत्सामान्यतोलक्षितंविशेषतस्त्रिविधं
पूर्ववत्शेषवत्सामान्यतोदृष्टंचेति. तत्रप्रथमंतावद्वीतमवीतंचेतिद्विविधं
अन्वयमुखेनप्रवर्त्तमानंविधायकंवीतं व्यतिरेकमुखेनप्रवर्त्तमानंनिषेधं।

कमवीतं नचावीतं शेषवत् शिष्यते परिशिष्यत इति शेषः स एव विषयतया यस्या-
स्त्यनुमानज्ञानस्य तच्छेषवत् यदाहुः प्रसक्तप्रतिषेधेन्यत्राप्रसंगात् शिष्यमाणे सं-
प्रत्ययः परिशेष इति अस्य चावीतस्य व्यतिरेकिण उदाहरणमग्रेभिधास्यति वीतं
च द्वेधा दृष्टस्वलक्षणसामान्यविषयमदृष्टस्वलक्षणसामान्यविषयं च तत्रैकं दृ-
ष्टस्वलक्षणसामान्यविषयं यत्तत्पूर्ववत् पूर्वंप्रसिद्धं दृष्टस्वलक्षणसामान्यमि-
ति यावत् तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्ववत् यथा धूमाद्वह्नित्वसामा-
न्यविशेषः पर्वतेनुमीयते तस्य वह्नित्वसामान्यविशेषस्य स्वलक्षणं वह्निविशेषो
दृष्टो रसवत्यां अपरं च वीतं सामान्यतोदृष्टं अदृष्टस्वलक्षणसामान्यविषयं य-
थेन्द्रियविषयमनुमानं अत्र हि रूपादिज्ञानानां क्रियात्वेन सकरणकत्वमनुमीय-
ते यद्यपि च करणत्वसामान्यस्य छिदादौ वास्यादि स्वलक्षणम् [illegible] उप-
लब्धं तथापि यज्जातीयं रूपादिज्ञाने करणमनुमीयते तज्जातीयस्य करणस्य
न दृष्टं स्वलक्षणं प्रत्यक्षेण इन्द्रियजातीयं हि तत्कारणं न चेन्द्रियत्वसामान्यस्य।
स्वलक्षणमिन्द्रियं प्रत्यक्षगोचरोर्वाग्दृशां यथा वह्नित्वसामान्यस्य स्वलक्षणं
वह्निः सोयं पूर्ववतः सामान्यतोदृष्टात्सत्यपि वीतत्वेन तुल्यत्वे विशेषेण तत्र दृ-
ष्टस्वलक्षणं प्रत्यक्षेण अत्र दृष्टं दर्शनं सामान्यत इति सामान्यस्य सार्वविभक्ति-

ॐ
सांख्य:

८ कस्तसि: अदृष्टस्वलक्षणसामान्यस्यदर्शनमनुमानमित्यर्थः सर्वंचैतदस्माभिर्न्या
यवार्त्तिकतात्पर्यटीकायांव्युत्पादितमितिनेहोक्तं विस्तरभयादिति प्रयोजकवृद्ध
शब्दश्रवणसमनन्तरं प्रयोज्यवृद्धप्रवृत्तिहेतुज्ञानानुमानपूर्वकत्वात् शब्दार्थसं
बंधग्रहस्यस्वार्थसंबंधग्रहसहकारिणश्च शब्दस्यार्थप्रत्यायकत्वादनुमानपूर्व
कत्वमित्यनुमानानन्तरंशब्दंलक्षयति आप्तश्रुतिराप्तवचनंत्विति तत्राप्तवचन
मितिलक्षणनिर्देशः परिशिष्टंलक्षणं आप्ताप्राप्त्युक्तेतियावत् आप्तवाचासोऽस्य
तिश्रुत्यामन्यश्रुतिः श्रुतिर्वाक्यजनितंवाक्यार्थज्ञानंतच्चस्वतःप्रमाणं अपौरुषेय
वेदजनितत्वेनसकलदोषशंकाविनिर्मुक्तंयुक्तंभवति एवंवेदमूलस्मृतीतिहा
सपुराणजनितमपिज्ञानंयुक्तं आदिविदुषश्चकपिलस्यकल्पादौकल्पान्तराधी
तश्रुतिस्मरणसंभवः सुप्तप्रतिबुद्धस्येवपूर्वेद्युरवगतानामर्थानामद्येद्युः त
९५ थाचावट्यजैगीषव्यसंवादेभगवान्जैगीषव्योदशमहाकल्पवर्तिजन्मस्मरणमा
त्मनउवाच दशमहासर्गेषुविपरिवर्तमानेनमयेत्यादिनाग्रंथसंदर्भेण आप्त
ग्रहणेनचायुक्ताः शाक्यभिक्षुनिर्ग्रन्थकसंसारमोचकादीनामागमाभा
साःपरिहृताभवंति अयुक्तत्वंचतेषांविगानात् विच्छिन्नमूलत्वात्प्रमाणविरु निन्दनादित्यर्थः
द्धार्थाभिधानाच्चकैश्चिदेवम्लेच्छादिभिःपुरुषापसदैःपशुप्रायैःपरिग्रहाद्बोद्ध

॰यो: ५ पा० ९४ चलवर्त्तितिपूर्वकत्वात्

यं तु शाब्देनानुमानाद्यावच्छिन्नति वाक्यार्थो हि प्रमेयो न तु तद्धर्मो वाक्यं येन तत्र लिं
गं भवेत् न च वाक्यं वाक्यार्थबोधसंबंधग्रहणमपेक्षते अभिनवकविरचित
स्य वाक्यस्यादृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वादिति एवं प्रमाणसामा
न्यलक्षणेषु तद्विशेषलक्षणेषु सत्सु यानि प्रमाणान्तराण्युपमानादीनि प्रतिवा
दिभिरभ्युपेयंते तान्युक्तलक्षणेष्वेव प्रमाणेष्वंतर्भवंतीति तथा हि उपमानं
तावद्यथा गौस्तथा गवय इति वाक्यं तज्जनिता धीरागम एव योऽप्ययं गवयशब्दो
गोसदृशस्य वाचक इति प्रत्ययः सोऽप्यनुमानमेव यो हि शब्दो यत्र वृद्धैः प्रयुज्यते
सोऽसति वृत्त्यन्तरे तस्य वाचको यथा गोशब्दो गोत्वस्य प्रयुज्यते चैष गवयशब्दो गो
सदृश इति तस्यैव वाचक इति तज्ज्ञानमनुमानमेव यत्तु गवयस्य चक्षुःसन्निकृ
ष्टस्य गोसादृश्यस्य ज्ञानं तत्प्रत्यक्षमेव अत एव स्मर्यमाणायां गवि गवयसादृ
श्यज्ञानं प्रत्यक्षं न ह्यन्यद्गवि सादृश्यमन्यच्च गवये भूयोऽवयवसामान्ययोगो जा
त्यन्तरवर्त्तीजात्यन्तरे सादृश्यमुच्यते सामान्ययोगश्चैकः स चेद्गवये प्रत्यक्षो ग
व्यपि तथैवेति नोपमाने प्रमेयान्तरमस्ति यत्र प्रमाणं भवेदिति न प्रमाणान्तरमुप
मानमिति एवमर्थापत्तिरपि न प्रमाणान्तरं तथा हि जीवतश्चैत्रस्य गृहाभावद
र्शनेन बहिर्भावस्यादृष्टस्य कल्पनमर्थापत्तिरभिमता वृद्धानां साप्यनुमानमेव

मेवर देवदत्तो बहिः सन् गृहासत्वे सति सत्वात् यो गृहासत्वे सति सन् स बहिः सन् यथाहमस्मि
यो बहिः सन्न स गृहासत्वे सति सन्न यथा विनष्टशरीरम् =

यदा खल्वल्पव्यापकः सन्नेकत्र नास्ति तदान्यत्रास्ति यदा वा व्यापक एकत्रास्ति तदान्यत्र नास्तीति सुकरः स्वशरीर एव व्याप्तिग्रहः तथा सति सतो गृहाभावदर्शनेन लिंगेन बहिर्भावदर्शनमनुमानं न च चैत्रस्य क्वचित्सत्वेन गृहाभावः शक्योपह्नोतुं येनासिद्धो गृहाभावो बहिर्भावे हेतुः स्यात् गृहाभावेन वा सत्वमपह्नूयते येन सत्वमेवा। नुपपद्यमानमात्मानं न बहिरवस्थापयेत् तथा हि चैत्रस्य गृहासत्वेन सत्वमात्रं वा विरुध्येत गृहासत्वं वा न तावद्यत्र क्वचन सत्वस्यास्ति विरोधो गृहासत्वेन भिन्नविषयत्वात् देशसामान्येन गृहविशेषाद्येपाक्षिक इति समानविषयतया विरोध इति चेन्न प्रमाणनिश्चितस्य गृहासत्वस्य पाक्षिकतया सांशयिकेन गृहसत्वेन प्रतिक्षेपायोगात् नापि प्रमाणविनिश्चितो गृहाभावः पाक्षिकं गृहसत्वं प्रतिक्षिपन्सत्वमपि प्रतिक्षेप्तुं सांशयिकत्वं वापनेतुमर्हतीत्युक्तं गृहावच्छिन्नेन चैत्राभावेन गृहसत्वं विरुद्धत्वात्प्रतिक्षिप्यते न तु सत्वमात्रं तस्य तत्रौदासीन्यात् तस्माद्गृहाभावेन सिद्धेन लिंगेन सतो बहिर्भावोऽनुमीयत इति युक्तं एतेन विरुद्धयोः प्रमाणयोरविरोधापादनेन विषयव्यवस्थयार्थापत्तिर्विषय इति निरस्तं अवच्छिन्नानवच्छिन्नयोर्विरोधाभावात् उदाहरणांतराणि चार्थापत्तेरेवानुमानेंतर्भावनीयानि तस्मान्नानुमानात्प्रमाणांतरमर्था।

गृहसत्वस्य सांशयिकत्वं =

गृहावच्छिन्नस्याभावं बहिर्देशावच्छिन्नस्य सत्वं

खारी द्रोणादिमती द्रोणाद्यविनाभूतखारीत्वात् यद्धूमसाधनवत् तदुक्तसाध्यवत् य
थाग्न्यादिकम् =

पत्तिरिति सिद्धं एवमभावोपि प्रत्यक्षमेव नहि भूतलस्य परिणामविशेषात्कैव
ल्यलक्षणादन्यो घटाभावो नाम प्रतिक्षणपरिणामिनो हि सर्वे एव भावा ऋते चिति
शक्तेः स च परिणामभेद ऐन्द्रियक इति नास्ति प्रत्यक्षात्प्रमेयान्तरं यत्राभावःप्रत्य
क्षाद्यनवरुद्धो विषयो यत्राभावाह्वयं प्रमाणान्तरमभ्युपेयमिति संभवस्तु यथा खा
र्यां द्रोणाढकप्रस्थावगमः सचानुमानमेव खारीत्वं द्रोणाद्यविनाभूतं प्रतीतं खा
र्यां द्रोणादिसत्त्वमवगमयतीति यच्चानिर्दिष्टप्रवक्तृकं प्रवादमात्रमिति होचुर्वृद्धा
इत्यैतिह्यं यथेह वटे यक्षः प्रतिवसतीति न तत्प्रमाणं अनिर्दिष्टप्रवक्तृकत्वेन सांश
यिकत्वात् आप्तप्रवक्तृत्वनिश्चये त्वागम इत्युपपन्नं त्रिविधं प्रमाणमिति
५ एवं तावद्व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिद्ध्यर्थं प्रमाणानि लक्षितानि तत्र व्यक्तं
पृथिव्यादि स्वरूपतः पामरोपललोष्टाद्यात्मना पांसुलपादोपि प्रत्यक्षतः प्रति
पद्यते पूर्ववता चानुमानेन धूमादिदर्शनाद्वह्न्यादीति तद्व्युत्पादनाय मन्दप्रयो
जनं शास्त्रमिति दुरधिगममेव व्युत्पादनीयं तत्र यत्प्रमाणं यत्र समर्थं तदुक्तल
क्षणेभ्यः प्रमाणेभ्यो निष्कृष्य दर्शयति सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीति
रनुमानात् तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धं ६ तु शब्दः प्रत्यक्षपू
र्ववद्भ्यां विशिनष्टि सामान्यतस्तु दृष्टादनुमानादध्यवसायो दतीन्द्रियाणां प्रधा
नपुरुषादीनां प्रतीतिः चितिच्छायापत्तिर्बुद्धेरध्यवसाय इत्यर्थः उपलक्षणं च

सि॰

हालिको

सां· १० नत् शेषवदित्यपि द्रष्टव्यं तत्किं सर्वेष्वतीन्द्रियेषु सामान्यतोदृष्टमेव प्रवर्त्तते तथा
यत्र यत्र तन्नास्तिमहदाद्यारंभकमेव स्वर्गापूर्वदेवतादौ च तेषामभावः प्राप्त इत्यत
आह तस्मादपिचासिद्धं परोक्षमाप्तागमात्सिद्धमिति तस्मादपीति सिद्धं चका
रेण शेषवतश्चत्यपि समुच्चितं स्यादेतत् यथा गगनकुसुमकूर्मलोमनरशश
विषाणादिषु प्रत्यक्षमप्रवर्त्तमानं तदभावमवगमयति एवं प्रधानादिष्वपि तत्
कथं तेषां सामान्यतोदृष्टादिभ्यः प्रसिद्धिरित्यत आह अतिदूरात्सामीप्यादि
न्द्रियघातान्मनोनवस्थानात्, सौक्ष्म्याद्व्यवधानादभिभवात्समानाभिहाराच्च
७ अनुपलब्धिरिति वर्त्तमाने सिंहावलोकनन्यायेनानुवर्त्तनीयं यथोत्प
तन्निपतति पतत्री अतिदूरात्सत्स्वपि प्रत्यक्षेणनोपलभ्यते सामीप्यादित्यत्रा
प्यनिरनुवर्त्तनीयं यथा लोचनस्थमंजनमतिसामीप्यान्न दृश्यते इन्द्रियघातात्।
इन्द्रियघाताधबाधिरत्वादि मनोनवस्थानात् यथा कामाद्युपप्लुतमनाः स्फीतालोक
मध्यवर्त्तिनमिन्द्रियसन्निकृष्टमप्यर्थं न पश्यति सौक्ष्म्यात् इन्द्रियसन्निकृष्टं परमाण्वा
दि प्रणिहितमना अपि न पश्यति व्यवधानात् यथा कुड्यादिव्यवहितं राजदारा हि
दि न पश्यति अभिभवात् यथाहनि सौरीभिर्भाभिरभिभूतं ग्रहनक्षत्रमण्डलं न
पश्यति समानाभिहारात् यथा तोयदविमुक्तानुजले विहृन्जलाशयेन पश्य,
ति चकारोनुक्तसमुच्चयार्थः तेनानुद्भवोपि संगृहीतः तद्यथा क्षीराद्यवस्थायां

नरेषु

दृश्याद्यनुपलब्धावानन्दकपने एतदुक्तं भवति न प्रत्यक्षनिवृत्तिमात्राद्वस्त्वभावो भवति अ-
तिप्रसंगात् तथा हि गृहाद्बहिर्निर्गतो गृहजनमपश्यन् तदभावं विनिश्चिनुयात्
अपि तु योग्यप्रत्यक्षनिवृत्तेरयमभावं विनिश्चिनोति न च प्रधानपुरुषादीनाम-
स्ति प्रत्यक्षयोग्यतेति न तन्निवृत्तिमात्रात्तदभावविनिश्चयो युक्तः प्रामा-
णिकानामिति। कतमत्पुनरेतेषां कारणं प्रधानादीनामनुपलब्धावित्यत आह
सौक्ष्म्यात्तदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः महदादि तच्च कार्यं प्रकृ-
तिसरूपं विरूपं च ८ सौक्ष्म्यात्तदनुपलब्धिः अथाभावादेव शशशृङ्गवदे-
तेषामनुपलब्धिः कस्मान्न भवतीत्यत आह नाभावात् कुतः कार्यतस्तदु-
पलब्धेः तदिति प्रधानं परामृशति पुरुषोपलब्धौ तु प्रमाणं वक्ष्यति संघातप-
रार्थत्वादिति इदं तावत्प्रमाणमवधारितं हि प्रत्यक्षमप्रवर्त्तमानमयोग्यता-
त्र प्रवर्त्तत इति कल्प्यते समस्तु इमान प्रमाणे नावधारिते इति न तत्र प्रत्य-
क्षायोग्यता नाशक्याध्यवसातुमित्यभिप्रायः किं पुनस्तत्कार्यं यतः प्रधाना-
नुमानमित्यत आह महदादि तच्च कार्यं एतच्च यथागमकं तथोपरिष्टादुप-
पादयिष्यते तस्य च कार्यस्य विवेकज्ञानोपयोगिनी सारूप्यवैरूप्ये आह प्र-
कृतिसरूपं विरूपं च एते चोपरिष्टाद्भजनीये इति कार्यात्कारणमात्रं

॥८

ॐ
सांख्य
२२

न्वि२ नथाहि४२ कुः

गम्यते संति चात्र वादिनां विप्रतिपत्तयः केचिदाहुः असतः सज्जायत इति
एकस्य सतो विवर्त्तः कार्यजातं न वस्तु सदित्यपरे अन्ये तु सतो सज्जायत इति
सतः सज्जायत इति वृद्धाः तत्र पूर्वस्मिन् कल्पत्रये प्रधानं न सिध्यति सुख
दुःखमोहभेदवच्छब्दाद्यात्मकता हि जगत्कारणस्य प्रधानत्वं सत्त्वरजस्तमः
स्वभावकत्वं यदि पुनरसतः सज्जायेत असन्निरुपाख्यं कारणं सुखादि
रूपशब्दाद्यात्मकं कार्यं स्यात् सदसतोस्तादात्म्यानुपपत्तेः अथैकस्य सतो
विवर्त्तः शब्दादिप्रपंचस्तथापि सतः सज्जायत इति न स्यात् नास्याद्वय
स्य प्रपंचात्मकत्वं निष्प्रपंचस्य प्रपंचात्मकतया भासनं भ्रान्तिरेव
येपि कणभक्षाक्षचरणतनया सतोसज्जन्मकारणाद्वक्ष्यन्ते तेषामपि सदसतोरेकत्वानुपपत्तेर्न कार्यात्मकं कारणमिति न प्र
धानसिद्धिः अतः प्रधानसिद्ध्यर्थं प्रथमं तावत्सत्कार्यं प्रतिजानीते
सत्कार्यं कारणव्यापारात्प्रागपीति शेषः तथा च न सिद्धसाधनं नै
यायिकतनयैरुद्भावनीयं यद्यपि बीजमृत्पिंडादिप्रध्वंसान
न्तरमंकुरघटाद्युत्पत्तिरुपलभ्यते तथापि न प्रध्वंसस्य कारण

कल्पयति

त्वेर

त्वमपितद्भावस्यैवबीजाद्यवयवस्याभावाद्भावस्योत्पत्तौनसर्वत्रसुलभत्वात्सर्वका
र्योत्पादनप्रसंगइतिन्यायवार्त्तिकतात्पर्यटीकायामुपपादितमस्माभिः प्रपंचप्रम
यत्नानामतिबाधकेऽप्यातिरिति शक्यतेवक्तुमितिकणभक्षाक्षचरणमतएवशिष्य
ते तत्रेदंप्रतिज्ञातंसत्कार्यमिति अत्रहेतुमाह असदकरणादुपादानग्रहणा
त्सर्वसंभवाभावात् शक्तस्यशक्यकरणात्कारणभावाच्चसत्कार्यं ९ असच्चेत्का
केनापि रणव्यापारात्पूर्वंकार्यंनास्यसत्वंशक्यंकेनापि नहिनीलंशिल्पिसहस्रेणापिपीतंक
र्तुंशक्यंसदसत्वेघटस्यधर्माविति चेत् तथाप्यसतिधर्मिणिनहितस्यधर्मइतिसत्वं
तदवस्थमेव तथाचनासत्वं असंबद्धेनातदात्मनाचासत्वेनकथमसत्वधर्मः त
स्मात्कारणव्यापारादूर्ध्वमिवप्रागपिततःसदेवकार्यं कारणाच्चास्याभिव्यक्तिरेवशि
ष्यते सतश्चाभिव्यक्तिरुपपन्नायथापावधानेनधान्येषुतंडुलानामवपीडनेनतिलेषु
तैलस्यदोहनेनसौरभेयीषुपयसः असतःकरणेतुननिदर्शनंकिंचिदस्तिनत्व।
त्वभिव्यज्यमानंचोत्पद्यमानंवाक्वचिदसदृष्टं इतश्चकारणव्यापारात्प्राक्सदेवका
र्यमित्याह उपादानग्रहणात् उपादानानिकारणानितेषांग्रहणंकार्येणसम्बंधः
उपादानैःकार्यस्यसंबंधादितियावत् एतदुक्तंभवति कार्येणसंबद्धंकारणंकार्य।
स्यजनकं संबंधश्चकारणेःकार्यस्यासतोनसंभवतितस्मात्सदिति स्यादेतत् अ

असदकर
णात्

ॐ
१२

संबद्धमेवकस्मात्कारणैः कार्यंनजन्यते तथाचासदेवोत्पद्येतेत्यतआह सर्वसंभवा
भावात् असंबद्धस्यजन्यत्वेअसंबद्धत्वाविशेषेण सर्वंकार्यजातंसर्वस्मात्संभवेत्
नचैतदस्ति तस्मात्संबद्धंसंबद्धेनैवजन्यते यथाहुः सांख्यवृद्धाः असत्वान्नास्तिसम्ब
न्धः कारणैः सत्वसंगिभिः असंबद्धस्यचोत्पत्तिमिच्छतोनव्यवस्थितिरिति स्यादेतत्
असंबद्धमेवचतदेवकरोति यत्रयत्कारणंशक्तं शक्तिश्चकार्यदर्शनादवगम्यते ते
ननाव्यवस्थेत्यतआह शक्तस्यशक्यकरणात् साशक्तिः शक्तकारणाश्रयासर्वत्र
वास्यात् शक्येवा सर्वत्रचेत्तदवस्थैवाव्यवस्था शक्येचेत्कथमसतिशक्येसास्यात्
तत्रेतिवक्तव्यं शक्तिभेदएवसतादृशोयतः किंचिदेवकार्यंजनयेन्नसर्वमितिचेत्,
हंतभोः शक्तिविशेषः कार्यसंबद्धोसंबद्धोवा संबद्धत्वे नासतासंबंधइतिसत्कार्यं
असंबद्धत्वेसैवाव्यवस्थेतिसुष्ठूक्तं शक्तस्यशक्यकरणादिति इतश्चसत्कार्यमित्या
ह कारणभावाच्च कार्यस्यकारणात्मकत्वाच्च नहिकारणाद्भिन्नंकार्यंकारणंचस
दितिकथंतदभिन्नंकार्यमसद्भवेत् कार्यस्यकारणाभेदसाधकानिचप्रमाणानि
नपटस्तंतुभ्योभिद्यते तद्धर्मत्वात् इहयद्यतोभिद्यतेतत्तस्यधर्मोनभवति य
थागौरश्वस्य धर्मश्चपटस्तंतूनांतस्मान्नार्थांतरं उपादानोपादेयभावाच्चनार्थांत
रत्वंतंतुपटयोः ययोरर्थांतरत्वंनतयोरुपादानोपादेयभावः यथाघटपटयोः

उपादानोपादेयभा[illegible]श्च तंतुपटयोस्तस्मान्नार्थान्तरत्वमिति इतश्च नार्थान्तरत्वं तंतु
पटयोः संयोगाप्राप्त्यभावात् अर्थान्तरत्वे हि संयोगो दृष्टो यथा कुंडबदरयोः
अप्राप्तिर्वा यथा हिमवद्विंध्ययोः न चेह संयोगाप्राप्ती तस्मान्नार्थान्तरत्वमिति
इतश्च पटस्तंतुभ्यो न भिद्यते गुरुत्वान्तरकार्याग्रहणात् इह यद्यस्माद्भिन्नं तस्मा
त्तस्य गुरुत्वान्तरकार्यं गृह्यते यथा पलिकस्य स्वस्तिकस्य गुरुत्वाकार्यावनति
विशेषस्तथा हि पलिकस्य स्वस्तिकस्य गुरुत्वकार्यावनतिविशेषोधिकः न च त
था तंतुगुरुत्वकार्यात्पटगुरुत्वस्य कार्यान्तरं दृश्यते तस्मादभिन्नस्तंतुभ्यः पट इ
ति तान्येतान्यवीतान्यभेदसाधकानि तदेवमभेदसिद्धे तंतव एव तेन तेन संस्था
नभेदेन परिणताः पटः न तंतुभ्योर्थान्तरं पटः स्वात्मनि क्रियानिरोधबुद्धिव्यप
देशार्थक्रियाभेदाश्च नैकान्तिकं भेदं साधयितुमर्हन्ति एकस्मिन्नपि तद्विशेषाऽवि
र्भावतिरोभावाभ्यामेतेषामविरोधात् यथा हि कूर्मस्यांगानि कूर्मशरीरे विशमानानि
तिरोभवन्ति निःसरन्ति वाविर्भवन्ति न तु कूर्मतस्तदंगान्युत्पद्यन्ते ध्वंसन्ते वा एवमेक
स्या मृदः सुवर्णस्य वा घटमुकुटादयो विशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इ
त्युच्यन्ते निविशमानास्तिरोभवन्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पादः सतां
वा निरोधः यथाह भगवान् कृष्णद्वैपायनः नासतो विद्यते भावो नाभावो विद्यते

वलत्रमाण
स्य =

उत्कर्षं इव
तिमेरता
स्वस्तिकेन्द
च्यते शोभा
विशेषो वुन
तिरुच्यते =

ॐ सां

15

मतइति यथाहि कूर्मः स्वावयवेभ्यः संकोचविकासिभ्यो नभिन्नः एवं घटमुकुटादयो
पिण्डकवर्णादिभ्योनभिन्ना एवंचेहतंतुषुपटइत्यादिव्यपदेशोयथेहवनेतिलकाइत्य
युपपन्नाः नचार्थक्रियाभेदोभेदमापादयति एकस्यापिनानार्थक्रियासंदर्शनात् य
थैकएववह्निर्दाहकःपाचकःप्रकाशकश्चेति नाप्यर्थक्रियाव्यवस्थावस्तुभेदहेतुः
तेषामेवसमस्तव्यस्तानामर्थक्रियाव्यवस्थादर्शनात् यथाप्रत्येकंविष्टयोवर्त्मद
र्शनलक्षणामर्थक्रियांकुर्वंति नतुशिबिकावहनंमिलितास्तुशिबिकामुद्वहंति।
एवंतंतवःप्रत्येकंप्रावरणमकुर्वाणाअपिमिलिताआविर्भूतपटभावाःप्रावरिष्य
ंति स्यादेतत् आविर्भावःपटस्यकारणव्यापारात्प्राक्सन्नसन्वा असंश्चेत् प्राप्तं त
र्हि असदुत्पादनं अथसन् कृतंतर्हिकारणव्यापारेण नहिसतिकार्येकारणानां
प्रयोजनंपश्यामः आविर्भावेचाविर्भावांतरकल्पनेनवस्थानात् तस्मादाविर्भूतप
टभावास्तंतवःक्रियंतइतिरिक्तंवचः अथासदुत्पद्यतइत्यत्रापिमतेकेयमुत्पत्तिःस
तीअसतीवा सतीचेत्कृतंकारणैः असतीचेत्तस्याप्युत्पत्त्यंतरमित्यनवस्था अथो
त्पत्तिःपटान्नार्थांतरमपितुपटएवासौतथापियावदुक्तंभवतिपटइति अतश्चप
टइत्युक्तेउत्पद्यतइतिनवाच्यं पौनरुक्त्यात् विनश्यतीत्यपिनवाच्यंविरोधात्।
तस्मादियंपटोत्पत्तिः स्वकारणसमवायोवास्वसत्तासमवायोवाउभयथापिनो

मैवं ५

स्यंते अथचतद्धर्मिणिकारणेनिर्व्यापार्ये तएव सतएव पटादेराविर्भावायकार।
णापेक्षेत्युपपन्नं नचपटरूपेणकारणानांसंबंधः तद्रूपस्याक्रियात्वात्। क्रियासंब
धित्वाच्चकारणानां अन्यथाकारणत्वाभावात् तस्मात्सत्कार्यमितिसुष्ठूक्तं तदेवंप्र
धानानुगुणसत्कार्यमुपपाद्ययादृशां तत्प्रधानंसाधनीयं तादृशमादर्शयितुंविवेक
ज्ञानोपयोगिनीव्यक्ताव्यक्तसारूप्यवैरूप्येआह हेतुमदनित्यमव्यापिसक्रियमनेक
माश्रितंलिंग सावयवंपरतंत्रंव्यक्तंतद्विपरीतमव्यक्तं १० व्यक्तंहेतुमत् हेतुःका
रणंतद्वत् यस्यचयोहेतुस्तमुपरिष्टाद्वक्ष्यति अनित्यंविनाशितिरोभावीत्यर्थः अ
व्यापिसर्वपरिणामि... नव्याप्नोति कारणेनहिकार्यमाविष्टंनकार्येणकारणंनच
मा बुद्ध्यादयःप्रधानंविघ्नंतीत्यव्यापकाः सक्रियंपरिस्पंदवत् तथाहिबुद्ध्यादयउ
पात्तमुपात्तंदेहंत्यजंतिदेहांतरंचोपाददत इतितेषांपरिस्पंदः शरीरपृथिव्यादी
नांचपरिस्पंदःप्रसिद्धएवा, नेकं प्रतिपुरुषंबुद्ध्यादीनांभेदात् पृथिव्याद्यपिश
रीरघटादिभेदेनानेकमेव आश्रितंस्वकारणमाश्रितंबुद्ध्यादिकार्यमभेदेपि हि
कथंचिद्भेदविवक्षयाआश्रयाश्रयिभावः यथेहवनेतिलकाइत्युक्तं लिंगंप्रधानस्य
यथाचैतेबुद्ध्यादयःप्रधानस्यलिंगं तथोपरिष्टाद्वक्ष्यति प्रधानंतुनप्रधानस्यलि
गंपुरुषस्यलिंगंभवेदपीतिभावः सावयवं अवयववक्ताश्र वियव वनमवयवोमि
श्रणंसंयोगइतियावत् अप्राप्तिपूर्विकाप्राप्तिःसंयोगस्तेनसहवर्तत इतिसाव

मिथःसंश्लेषो २

ॐ
सां॰
त॰

यथा हि पृथिव्यादयः परस्परं संयुज्यन्ते एवमन्येपि न तु प्रधानस्य बुद्ध्यादि।
भिः संयोगः तादात्म्यात् नापि सत्त्वरजस्तमसां परस्परं संयोगः अप्राप्तेरभावात्।
परतन्त्रं बुद्ध्यादि कार्यं हि अहंकारादीन् जनयितुं प्रकृत्यापूरमपेक्षते अन्यथा क्षीणा
सती नालमहंकारं जनयितुमिति स्थितिः एवमहंकारादिभिरपि स्वकार्यजनन
इति सर्वं कार्यं प्रकृत्यापूरमपेक्षते तेन प्रकृतिपरामपेक्षमाणं स्वकार्योपजनने
परतन्त्रं व्यक्तं विपरीतमव्यक्तं व्यक्तात् अहेतुमत् नित्यं व्यापि निष्क्रियं यद्यप्य
व्यक्तस्यापि परिणामलक्षणा क्रिया तथापि परिस्पन्दो नास्ति एकमनाश्रितमलि
गमनवयवं स्वतन्त्रमव्यक्तं तदनेन प्रबन्धेन व्यक्ताव्यक्तयोर्वैधर्म्यमुक्तं संप्रति तयोः
साधर्म्यं पुरुषाच्च वैधर्म्यमाह त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसव।
धर्मि व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ११ त्रिगुणं त्रयो गुणाः सुख नैयायिकाभिमते
दुःखमोहा अस्येति त्रिगुणं तदनेन सुखादीनामात्मगुणत्वं परोभिमतमपाकृतं
अविवेकि यथा प्रधानं न स्वतो विविच्यते एवं महदादयोपि न प्रधानाद्विविच्य
न्ते तदात्मकत्वात् अथवा संभूयकारिता अविवेकिता नहि किंचिदेकं पर्याप्तं कार्यं वि त्र
तुं संभूय तत्र नैकस्मात्कस्यचित्संभव इति ये त्वाहुर्विज्ञानमेव हर्षविषादमोहश १४
ब्दाद्याकारं न तु इतोन्यस्तद्धर्मो वेति तान्प्रत्याह विषय इति विषयो ग्राह्यः वि
ज्ञानाद्बहिरिति यावत् अत एव सामान्यं साधारणं घटादिवदनेकैर्गृह्यत इति

त्व
विज्ञानाकारत्वे साधारणत्वाद्विज्ञानानां वृत्तिरूपाणां नैष साधारणः स्युः विज्ञानं यथाप
रस्परेण न गृह्यते परबुद्धेरप्रत्यक्षत्वात् तथा च सति चारुनर्तकीभ्रूलताभंगे एकस्मिन्बहू
नांप्रतिसंधानमुक्तं अन्यथा न स्यादिति भावः अचेतनं सर्व एव प्रधानबुद्ध्यादयोऽचेतना
बौद्ध नन्तु वैनाशिकवच्चेतनं बुद्धेरित्यर्थः प्रसवधर्मि प्रसवरूपो धर्मो यः सोऽस्यास्तीति प्रसव
धर्मि प्रसवधर्मेति वक्तव्ये मत्वर्थीयः प्रसवधर्मस्य नित्ययोगमाख्यातुं सरूपविरूपप
रिणामाभ्यां न कदाचिदपि वियुज्यत इत्यर्थः अव्यक्तं तमव्यक्तेति दिशति यथाव्यक्तं तथा
प्रधानं प्रधानमपीत्यर्थः ताभ्यां वैधर्म्यं पुरुषस्याह तद्विपरीतः पुमान् स्यादेतदहेतुम
त्वनित्यत्वादि प्रधानसाधर्म्यमस्ति पुरुषस्य एवमनेकत्वं व्यक्तसाधर्म्यं तत्कथमुच्यते त
द्विपरीतः पुमानित्यत आह तथा च चकारोऽप्यर्थः यद्यप्यहेतुमत्त्वादिसाधर्म्यं तथापि
त्रैगुण्यादिवैपरीत्यमस्येत्यर्थः ^त्रिगुणमित्युक्तं तत्र के ते त्रयो गुणाः किं च तद्रूपलक्षणमि
११ त्यत आह प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रय
जननमिथुनवृत्तयश्च गुणाः ॥ प्रीत्यप्रीतिविषादात्मकाः गुणाः गुणा इति परार्थाः सत्त्वं
लघुप्रकाशकमित्यत्र क्रमेण निर्दिश्यते तदनागतावेक्षणेन तत्र युक्त्या प्रीत्यादीनां यथा
संवेदितव्यं एतदुक्तं भवति प्रीतिः सुखं प्रीत्यात्मकं सत्त्वगुणः अप्रीतिर्दुःखं अप्रीत्या
त्मको रजोगुणः विषादो मोहः विषादात्मकस्तमोगुण इति येऽतु मन्यन्ते प्रीतिर्दुःखाऽ
भावान्नातिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान्प्रत्यात्मग्रहणं नेतरे

एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते तथाहि सत्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते एवं रजः सत्वतमसी अभिभूय घोरामिति अन्योन्याश्रयवृत्तयः यद्यप्याधाराधेयभावेन नायमर्थो

अघोरम् तमः सत्वरजसी अभिभूय

तराभावाः सुखादयोपि तु भावाः आत्मशब्दस्य तु भाववचनत्वात् प्रीतिरात्माभावो येषां ते प्रीत्यात्मानः एवमसदपि व्याख्येयं भावरूपताचैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः तद्रूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथा संख्यमेव रजः प्रवर्त्तकत्वात्सर्वत्र लघु सत्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत तमोनियतं तु क्वचिदेव प्रवर्त्तयतीति भवति तमो नियमार्थं प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसंबध्यते अन्योन्याभिभववृत्तयः लयाभावात् अन्योन्यमिथुनवृत्तयः अन्योन्यसहचराः अविनाभाववर्तिन इति यावत् चः समुच्चये भवति चात्रागमः अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः रजसो मिथुनं सत्वं सत्वस्य मिथुनं रजः तमसश्चापि मिथुने ते सत्वरजसी उभे उभयोः सत्वरजसोर्मिथुनं तम उच्यते नैषामादिः संप्रयोगो वियोगो नोपलभ्यते इति प्रकाशप्रवृत्तिनियमार्थी इत्युक्तं ते के इत्यपेक्षितायां तत्स्वरूपमाह सत्वं लघु प्रकाशकमिति सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ १३ ॥ सत्वमेव लघु प्रकाशकमिष्टं सांख्याचार्यैः तत्र कार्योद्गमने हेतु धर्मो लाघवं गौरवप्रतिद्वंद्वि यतो गुरु ऊर्ध्वज्वलनं भवति तदेव लाघवं कस्यचित्तिर्यग्गमने हेतुर्यथा वायोः ॥ एवं करणानां वृत्तिपटुता हेतुर्लाघवं गौरवे तु प्रतिद्वंद्वि यतः पटुत्वे हेतुर्लाघवं गुरु

त्वमयः अन्यतमान्यतमं जनयति जननं च परिणामः स च गुणानां सदृशरूपः अत एव न हेतुमत्वम

त्वेमंदानिंस्तुरिति सत्त्वस्य प्रकाशात्मकत्वमुक्तं सत्त्वं तमसावष्टब्धमक्रियतया स्वकार्य
प्रवृत्तिं प्रत्यवसीदतीरजसोपष्टभ्यते तेवसादात्प्रच्याव्य स्वकार्ये उत्साहे प्रयत्नं कार्यते।
तदिदमुक्तं उपष्टंभकं रज इति कस्मादित्यत उक्तं चलमिति तदनेन रजसः प्रवृत्य
र्थत्वं दर्शितं रजस्तु चलतया परितस्त्रैगुण्यमेव चालयद्गुरुणाऽऽवृण्वता तमसा नत्वतत्र सर्व
त्रिप्रतिबंधकेन क्वचिदेव प्रवर्त्यत इति ततस्तेनायाहृत्यात मे आवरणकत्वमुक्तं गुरु मोनियाम
^वर ^एकमेव तमस इति एवकारः प्रत्येकं भिन्नक्रमः लघ्वेव सत्त्वमेव रज एव तम एवे
ति नन्वेते परस्परविरोधशीला गुणाः सुंदोपसुंदवत्परस्परं ध्वंसत इत्येव युक्तं प्रा ^का
प्रा गेव ते ... मेकक्रियाकर्तृतेत्यत आह प्रदीपवच्चार्थतो वृत्तिः दृष्टमेतद्यथा
वर्तितैले नलविरोधिनी अथ च मिलिते महानलेन रूपप्रकाशलक्षणं कार्यं कु
रुतः यथा वा वातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षणकार्य
कारिणः एवं सत्त्वरजस्तमांसि मिथो विरुद्धान्यपि अनुवर्त्स्यंति च स्वकार्यं करिष्यं।
ति च अर्थतः इति पुरुषार्थतः यथा वक्ष्यति पुरुषार्थ एव हेतुर्न केनचित्कार्यते।
कारणमिति अत्र च सुखदुःखमोहाः परस्परं विरोधिनः स्वानुरूपाणि सुखदुःख
मोहात्मकान्येव निमित्तानि कल्पयंति तेषां च परस्परमभिभाव्याभिभावक।
भावान्नानात्मकत्वं तद्यथा एकैव स्त्री रूपयौवनकुलशीलसंपन्ना स्वामिनं सु

षामन्यतमे…
मते ए…

सां॰
त्व॰
१६

खा करोति तत्कस्य हेतोः स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात् सैव स्त्री सपत्नीर्दुःखा
करोति तत्कस्य हेतोस्ताः प्रति तस्या दुःखरूपसमुद्भवात् एवं पुरुषान्तरं तामविन्दमानं
सैव मोहयति तत्कस्य हेतोस्तं प्रति तस्या मोहसमुद्भवात् अनया च स्त्रिया सर्वे भावा व्या
ख्याताः तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं यद्दुःखहेतुः तद्दुःखात्मकं रजः यन्मो
हहेतुस्तन्मोहात्मकं तमः सुखप्रकाशलाघवानां त्वेकस्मिन्युगपदुद्भूतावविरोधः
सहदर्शनात् तस्मात्सुखदुःखमोहैरिव विरोधिभिरविरोधिभिरेकैकगुणवृत्ति।
भिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते एवं दुःखोपष्टम्भकत्वप्रवर्तकत्वैः
एवं मोहगुरुत्वावरणैस्त्रैरिति सिद्धं त्रैगुण्यमिति स्यादेतत् अनुभूयमानेषु पृथिव्या
दिषु नु भवन्तु सिद्धा मा भूवंस्त्वविवेकित्वादयः ये पुनः सत्त्वादयो नानुभवपथमधिरोहन्ति ते
षां कुतस्त्यमविवेकित्वविषयित्वसामान्यत्वमचेतनत्वं प्रसवधर्मित्वं चेत्यत आह
अविवेक्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययाभावात् कारणगुणात्मकत्वात् कार्यस्या
भावप्रधाननिर्देशः व्यक्तमपि सिद्धं अविवेकित्वमविवेकि यथा द्वौ कयोर्द्विवचनैकवचने इत्यत्र द्वित्वैक
त्वयोरिति अन्यथा द्वौ केष्विति स्यादिति कुतः पुनरविवेक्यादिसिद्धिरित्यत आह
त्रैगुण्यात् यद्यत्सुखदुःखमोहात्मकं तत्तदविवेक्यादियोगि यथेदमनुभूय १६
मानं व्यक्तमिति स्फुटत्वादन्वयो नोक्तः व्यतिरेकमाह तद्विपर्ययाभावात् अविवे

सत्त्वादयस्त्वविवेक्यादियोगिनः सुखदुःखमोहात्मकत्वात् २

पूर्वं व्यक्तं दृष्टान्तीकृत्याव्यक्तं पक्षीकृत्य त्रैगुण्याद्धेतोरविवेकित्वं साधितम् इदानीं शेषवताऽनुमानेन व्यक्ताव्यक्तयोरुभयोस्तेनैव
हेतुना तदेव साधयति अथवेति इदं व्यक्तमव्यक्तं च अविवेक्यादियोगि त्रैगुण्यात् यत्राविवेक्याद्यभावः तत्र त्रैगुण्याभावः यथा पु
रुष इति यत्र त्रैगुण्यं तत्राविवेक्यादि इति न भवति व्यक्ताव्यक्तभिन्नदृष्टान्ताभावात्

क्यादिविपर्यये पुरुषे त्रैगुण्याभावात् अथ च व्यक्ताव्यक्ते पक्षीकृत्यान्वयाभावेन त्रैगु
ण्यादित्यवीत एव हेतुर्वक्तव्यः स्यादेतत् अव्यक्तसिद्धौ सत्यां तस्याविवेक्यादयो धर्माः
सिध्यन्ति अव्यक्तमेव त्वद्यापि न सिद्ध्यति तत्कथमविवेक्यादिसिद्धिरित्यत आह कार
णगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धं अयमभिसंधिः कार्यं हि कारणगुणात्म
कं दृष्टं यथा तन्त्वादिगुणात्मकं पटादि तथा महदादिलक्षणेन कार्येण सुखदुःख।
मोहरूपेण स्वकारणगतसुखदुःखमोहात्मना भवितव्यं तथा च तत्कारणं सुखदुः
खमोहात्मकं प्रधानमव्यक्तं सिद्धं भवति स्यादेतत् व्यक्ताद्व्यक्तमुत्पद्यत इति काणभ
क्षाक्षचरणतनयाः परमाणवो हि व्यक्ताः तैर्द्व्यणुकादिक्रमेण पृथिव्यादिलक्षणं का
र्यं व्यक्तमारभ्यते पृथिव्यादिषु च कारणगुणक्रमेण रूपाद्युत्पत्तिः तस्माद्व्यक्ताद्व्यक्त।
स्य तद्गुणस्य चोत्पत्तेः कृतमव्यक्तेनेत्यत आह भेदानामिति भेदानां प।
रिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च कारणकार्यविभागादविभागाद्वैश्व।
रूप्यस्य १५ भेदानां विशेषाणां महदादीनां भूतानां कारणं मूलकारणम्। ना
स्त्यव्यक्तं अतः कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य कारणे सत्कार्यमिति स्थि
तं तथा च यथा कूर्मशरीरे सन्त्येवाङ्गानि निःसरन्ति विभज्यन्ते इदं कूर्मशरीरमेता
न्येतस्याङ्गानीति एवं निविशमानानि तस्मिन्नव्यक्तीभवन्ति एवं मृत्पिण्डाद्धेमपिण्डाद्वा
कार्याणि घटमुकुटादीनि सन्त्येवाविर्भवन्ति विभज्यन्ते सन्त्येव च पृथिव्यादीनि कार।

एणतन्मात्राद्विभज्यंते संत्येवचतन्मात्राण्यहंकारात्कारणात् सन्नेवचाहंकारः कार
णान्महतः सन्नेवमहान्परमाव्यक्तादिति सोयंकारणात् परमाव्यक्तात् साक्षात्पारंप
र्येणविश्वस्यकार्यकलापस्यविभागः प्रतिसर्गेतुमृत्पिंडहेमपिंडवाघटमुकुटादयो
निविशंतोव्यक्तीभवंति तत्कारणरूपमेवानभिव्यक्तकार्यमपेक्ष्याव्यक्तंभवति एवंपृ
थिव्यादयस्तन्मात्राणिविशंतःस्वापेक्षयातन्मात्राण्यव्यक्तयंति, एवंतन्मात्राण्यहंकारंवि
शंति अहंकारमव्यक्तयंति एवमहंकारोमहांतमाविशन्महांतमव्यक्तयति महा
न्प्रकृतिंस्वकारणंविशति प्रकृतेस्तुनक्वचिन्निवेशइति सासर्वकार्याणामव्यक्तमेवं
सोयमविभागः प्रकृतौवैश्वरूप्यस्यनानारूपकार्यस्य स्वार्थेष्यञ् तस्मात्कारणे।
कार्यस्यसतएवविभागाविभागाभ्यामव्यक्तंकारणमस्तीति, इतश्चाव्यक्तमस्तीत्या
ह शक्तितःप्रवृत्तेश्च कारणशक्तितःकार्यंप्रवर्त्ततइतिसिद्धं अशक्तात्कारणात्का
र्यस्यानुत्पत्तेः शक्तिश्चकारणगतानकार्यस्याव्यक्तत्वादन्या नहिसत्कार्यपक्षेकार्य
स्याव्यक्ततायाअन्यस्यांशक्तौप्रमाणं अयमेवहिसिकताभ्यस्तिलानांतैलो
पादानानांभेदोयदेतेष्वेवतैलमस्ति अनागतावस्थंनसिकतास्विति, स्यादेतत् श
क्तितःप्रवृत्तेः कार्यकारणविभागाविभागौचमहतएवपरमाव्यक्तत्वंसाधयिष्यतः
कृतंततःपरेणाव्यक्तेनेत्यतआह परिमाणात् परिमितत्वादव्यापित्वादिति।
यावत् विवादाध्यासितामहदादिभेदाःअव्यक्तकारणवंतः परिमितत्वात् घ

दादिवत् घटादयो हि परिमिता मृदाद्यव्यक्तकारणका दृष्टाः उक्तमेतद्यथा कार्यस्याव्य
क्तावस्था कारणमेवेति यन्महतः कारणं तत्परमव्यक्तं ततः परतराव्यक्तकल्पनायां प्र
माणाभावात् इतश्च विवादाध्यासिता भेदा अव्यक्तकारणवंतः समन्वयात् भिन्नानां स
मानरूपता समन्वयः सुखदुःखमोहसमन्विता हि बुद्ध्यादयोऽध्यवसायादिलक्षणाः
प्रतीयंते यानि च यद्रूपसमनुगतानि तानि तत्स्वभावाव्यक्तकारणकानि यथा मृद्धे
मपिंडसमनुगता घटमुकुटादयो मृद्धेमपिंडाव्यक्तकारणा दृष्टा इति कारणमव्यक्तं भे
दानामिति सिद्धं अव्यक्तं साधयित्वाऽस्य प्रवृत्तिप्रकारमाह कारणमव्यक्तं प्रवर्त्तते त्रि
गुणतः समुदयाच्च परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥१६॥ प्र
वर्त्तते त्रिगुणतः प्रतिसर्गावस्थायां सत्त्वं रजः तमश्च सदृशपरिणामानि भवंति परि
णामस्वभावका हि गुणा नापरिणम्य क्षणमप्यवतिष्ठंते तस्मात् सत्त्वं सत्त्वरूपत
या रजो रजोरूपतया तमस्तमोरूपतया प्रतिसर्गावस्थायां प्रवर्त्तते तदिदमुक्तं त्रिगु
णत इति प्रवृत्त्यंतरमाह समुदयाच्च समेत्योदयः समुदयः समवायः समुदयश्च
गुणानां न गुणप्रधानभावमंतरेण संभवति न च गुणप्रधानभावो वैषम्यं विना न
च वैषम्यमुपमर्द्योपमर्दकभावादृते इति महदादिभावेन प्रवृत्तिर्द्वितीया स्यादेत
त् कथमेकरूपाणां गुणानामनेकरूपा प्रवृत्तिरित्यत आह परिणामतः सलि
लवत् यथा हि वारिदमुक्तमुदकमेकरसमपि तत्तद्विकारानासाद्य नारिकेल
तालीबिल्वचिरबिल्वामलककपित्थफलरसतया परिणमत् मधुराम्ललव

का स्य स्त

ॐ
सांख्य
१८

वा

॥ तिक्तकटुकषायतया विकल्प्यते, एवमेकैकसमुद्भूतप्रधानगुणमा-
श्रित्याप्रधाना गुणाः परिणामभेदान् प्रवर्तयन्ति तदिदमुक्तं प्रति
प्रतिगुणाश्रयविशेषात् एकैकगुणाश्रयतया विशेषस्तस्मादित्यर्थः :
येन्ते हि काऽव्यक्तं वा बुद्धिं वाहंकारं वा इन्द्रियाणि वा आत्मानमभि
मन्यमानास्तान्येवोपासते तान्प्रत्याह संघातेति संघातपरार्थत्वात् त्रि। संघातस्य पुरुषार्थत्वादिति भावः
गुणादिविपर्ययादधिष्ठानात् पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृ-
त्तेश्च १७ पुरुषोऽस्ति अव्यक्तादेर्व्यतिरिक्तः कुतः संघातपरार्थत्वात् अ-
व्यक्तमहदहंकारादयः परार्थाः संघातत्वात् शयनासनाद्यंगवत् सुखदुः-
खमोहात्मकतया व्यक्तादयः सर्वे संघाताः स्यादेतत् शयनासनादयः
घ संघाताः संहतपरार्था दृष्टाः न त्वात्मानमव्यक्ताद्व्यतिरिक्तं प्रतिपरार्था :
स्तस्मात्संघातान्तरमेव परं गमयेयुः न तु संघातमात्मानमित्यत आह त्रिगु-
णादिविपर्ययात् अयमभिप्रायः संघातान्तरार्थत्वे हि तस्यापि संघातत्वात्
तेनापि संघातान्तरार्थेन भवितव्यं एवं तेन तेनेत्यनवस्था स्यात् नच
व्यवस्थायां सत्यामनवस्थाकल्पना युक्ता गौरवप्रसंगात् नच प्रमाण

वर्तेन काल्यनाशो स्वमपीक्षत इति युक्तं संघातत्वस्य परार्थमात्रेण त्वया
तु दृष्टान्तदृष्टसर्वधर्मानुरोधेन त्वनुमानमिच्छतः सर्वानुमानोच्छेदप्रसंगइ
त्युपपादितं न्यायवार्त्तिकतात्पर्यटीकायामस्माभिः तस्मादनवस्थाभिया
आत्मनः स्यासंघातत्वाभिद्धता त्रिगुणत्वविवेकित्वमविषयत्वमसामान्यत्वं चेतन न।
त्वं मप्रसवधर्मि चासुपलब्धे त्रिगुणत्वादयो हि धर्माः संघातत्वेन व्याप्ताः त
दस्मिन्परे संघातत्वव्यावर्तमानस्त्रैगुण्यादिकं व्यावर्तयति ब्राह्मण्यमिव।
शाखा व्यावर्तमानं कठत्वादि व्यावर्तयति तस्मादाचार्येण त्रिगुणत्वादिविपर्ययादिति
वदता संहतः परो विवक्षितः स चात्मेति सिद्धं इतश्च पुरुषोऽस्ति अधिष्ठानाच्च त्रि
गुणात्मका[illegible]धिष्ठीयमानत्वात् यद्यत्सुखदुःखमोहात्मकं तत्सर्वं परेणा[illegible]ष्ठीय घि
मानं दृष्टं यथा रथादि यंत्रादिभिः सुखदुःखमोहात्मकं चेदं बुध्यादि तस्मादेतदपि
४ परः परेणाधिष्ठातव्यं स च त्रैगुण्यादन्य आत्मेति सिद्धं इतश्चास्ति पुरुषो भोक्तृभावात्
भोक्तृभावेन भोग्ये सुखदुःखे उपलक्षयति भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवे
दनीये प्रत्यात्ममनुभूयेते तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन केनचिदन्येन
भवितव्यं न चानुकूलनीयाः प्रतिकूलनीया वा बुद्ध्यादयः तेषां सुखाद्यात्मकत्वेन

ना: सुखदु:खमोहात्मकं इदं

स्यस्य स्वात्मनि विरोधात् पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥१८॥

सांख्य १९ स्वात्मनि वृत्तिविरोधात् तस्माद्यो सुखाद्यात्मा सो ऽनुकूलनीयः प्रतिकूलनीयो वा स चा
त्मेति अन्ये त्वाहुः भोग्या दृश्या सुखादयः न च द्रष्टारमन्तरेण दृश्यता युक्ता तेषां त
स्मादस्ति द्रष्टा दृश्यसुखाद्यतिरिक्तः स चात्मेति भोक्तृभावात् द्रष्टृभावात् दृश्येन
द्रष्टुरनुमानादिति भावः दृश्यत्वं च सुखादीनां सुखाद्यात्मकतया पृथिव्यादिवद
नुमितं इतश्चास्ति पुरुष इत्याह कैवल्यार्थं प्रवृत्तेश्च शास्त्राणां महर्षीणां च दिव्य
दुःखा लोचनानां कैवल्यं चात्यन्तिकदुःखत्रयप्रशमनलक्षणं सुखादीनां न संभवति
ते हि सुखाद्यात्मकाः कथं स्वभावाद्वियोजयितुं शक्यन्ते तदतिरिक्तस्य त्वात्म
नस्ततो वियोगः शक्यसम्पादः तस्मात्कैवल्यार्थप्रवृत्तेरागमानां महाधियां चा
स्ति सुखाद्यतिरिक्त आत्मेति सिद्धं तदेवं पुरुषस्यास्तित्वं प्रतिपाद्य स किं शरीरेष्वे
कः किमनेकः प्रतिदेहमिति संशये तस्य प्रतिदेहमनेकतां प्रतिपादयितुमाह
जननेति जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च पुरुषबहुत्वं सि
द्धं कस्मात् जननमरणकरणानां प्रतिनियमात् जातिविशिष्टाभिरपूर्वाभि
र्देहेन्द्रियमनोहंकारबुद्धिवेदनाभिः पुरुषस्याभिसम्बन्धो जन्म न तु पुरुषस्य परि पु
णामस्तस्यापरिणामित्वात् तेषामेव देहादीनामुपात्तानां परित्यागो मरणं न त्वा

निकाय

त्मनो विनाशात् स्वकृतस्य नित्यत्वात् करणानि बुद्ध्यादीनि त्रयोदश तेषां जन्म
मरणकारणानां प्रतिनियमो व्यवस्था सा खल्वियं सर्वशरीरेष्वेकस्मिन् पुरुषे
नोपपद्यते तदा खल्वेकस्मिन् पुरुषे जायमाने सर्वे जायेरन् म्रियमाणे च म्रियेर
न् अंधादौ चैकस्मिन् सर्व एवांधादयः स्युः विचित्ते चैकस्मिन् सर्व एव विचित्ताः स्यु
रित्यव्यवस्था न चैकस्यापि पुरुषस्य देहोपाधानभेदाद्व्यवस्थेति युक्तं पाणिस्त
धि नाद्युपादानभेदेनापि जन्ममरणादिप्रसंगात् नहि पाणौ कृत्ते जाते वा स्तनादौ
मृतत्वचयवेष्ववर्तिज्ञानाकाशता वा भवतीति इतश्च प्रतिक्षेत्रं पुरुषभेद इत्याह अ
युगपत्प्रवृत्तेश्च प्रवृत्तिः प्रयत्नलक्षणा यद्यप्यंतःकरणवर्तिनी तथापि पुरुष
उपचर्यते तथा च तस्मिन्नेकस्मिन् शरीरे प्रयतमाने सर्वेष्वेव शरीरेष्वेक इति सर्व
त्र प्रयतेत ततश्च सर्वाण्येव शरीराणि युगपच्चालयेत् नानात्वे तु नायं दोष इति
इतश्च पुरुषभेद इत्याह त्रैगुण्यविपर्ययाच्चैव एवकारो भिन्नक्रमः सिद्धमित्य
स्यानंतरं द्रष्टव्यः सिद्धमेव नासिद्धं त्रयो गुणास्त्रैगुण्यं तस्य विपर्ययोऽन्यथाभावः
केचित्खलु सत्वनिकायाः सत्वबहुलाः यथोर्ध्वस्रोतसः केचिद्रजोबहुला यथा म
नुष्याः केचित्तमोबहुला यथा तिर्यग्योनयः सोयमीदृशस्त्रैगुण्यविपर्ययोऽन्य
थाभावः तेष्वेतेषु सत्वनिकायेषु न भवेत् यद्येकः पुरुषः स्यात् भेदे त्वयमदो

पुरुष

समुच्चये ३

षः एवं पुरुषबाहुल्यं प्रसाध्य विवेकज्ञानोपयोगितया तस्य धर्मानाह तस्माच्च वि
पर्यासादिति ॥ तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य कैवल्यं माध्यस्थ्यं
द्रष्टृत्वमकर्तृभावाश्च १९ तस्माच्चेति चकारः पुरुषबहुत्वेन सह धर्मान्तराणि
समुच्चिनोति विपर्यासादित्युक्ते त्रैगुण्यविपर्ययादित्यनन्तरोक्तं संबध्येत अ
तस्तन्निरासाय तस्मादित्युक्तं अनन्तरोक्तं हि सन्निधानादिदंशब्दविषयो विप्रकृष्टं
तदिति विप्रकृष्टं त्रिगुणमविवेकीत्यादि संबध्यते तस्मात् त्रिगुणादेर्यो विप त्वा
र्यासः पुरुषस्यात्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वं चेतनत्वमप्रसव
अविषयत्वेन च धर्मित्वं च तत्र चेतनत्वेन साक्षित्वद्रष्टृत्वे दर्शिते चेतनो हि द्रष्टा भवति नाचेतनः
साक्षी च दर्शितविषयो भवति यस्मै दर्श्यते विषयः सः साक्षी भवति यथा हि लो
केऽर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः एवं प्रकृतिरपि स्वचरितं वि
षयं पुरुषाय दर्शयतीति पुरुषः साक्षी न चाचेतनो विषयो वा शक्यो विषयं द
र्शयितुमिति चेतन्यादविषयत्वाच्च भवति साक्षी अत एव द्रष्टापि भवति अत्रैगु
ण्याच्चास्य कैवल्यं आत्यन्तिकदुःखत्रयाभावः कैवल्यं तच्चैतस्य स्वाभाविकादेवा
त्रैगुण्यात् सुखदुःखमोहरहितत्वात्सिद्धं अत एव त्रैगुण्यान्माध्यस्थ्यं सुखी हि
सुखेन तृप्यन् दुःखी च दुःखं द्विषन् न मध्यस्थो भवति तदुभयरहितस्तु।

न२

स्वाभाविकं ३

मध्यस्थ इति उदासीन इति व्याख्यायते विवेकित्वादप्रसवधर्मित्वाच्चाकर्त्तेति सिद्धं
स्यादेतत् प्रमाणेन कर्त्तृसामर्थ्यमवगम्य चेतनोऽहं चिकीर्षन् करोमीति कृतिचै
तन्ययोः सामानाधिकरण्यमनुभवसिद्धं तदस्मिन्मते नावकल्पते चेतनस्याकर्त्तृ
त्वात् कर्त्तुश्चाचेतनत्वादित्यत आह तस्मात्तत्संयोगादचेतनमिति तस्मात्तत्सं
योगादचेतनं चेतनावदिव लिंगं गुणकर्त्तृत्वे च तथा कर्त्तेव भवत्युदासीनः २०
यतश्चेतनस्य कर्त्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्माद्भ्रान्तिरित्यर्थः लिंगं मह
दादिसूक्ष्मपर्यन्तं वक्ष्यति भ्रान्तिबीजं तत्संयोगस्तत्सन्निधानं अतिरोहितम
स्मात् २० तस्मात्तत्संयोगादित्युक्तं न च भिन्नयोः संयोगोपेक्षां विना न चेयमु
पकार्योपकारिभावं विनेत्यपेक्षाहेतुमुपकारमाह पुरुषस्य दर्शनार्थमिति
पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य पङ्ग्वन्धवदुभयोरपि संयोगस
त्कृतः सर्गः २१ प्रधानस्येति कर्मणि षष्ठी प्रधानस्य सर्वकारणस्य यत् द
र्शनं पुरुषेण तदर्थं तदनेन भोग्यता प्रधानस्य दर्शिता ततश्च भोग्यं प्रधानं
भोक्तारमन्तरेण न भवतीति युक्ता ततोऽस्य भोक्त्रपेक्षा पुरुषस्यापेक्षां दर्शयति
पुरुषस्य कैवल्यार्थमिति तथाहि भोग्येन हि प्रधानेन संभिन्नः पुरुषः स्वगतं
दुःखत्रयमात्मन्यभिमन्यमानः पुरुषः कैवल्यं प्रार्थयते तच्च सत्त्वपुरुषा

सत्ताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते अनादित्वाच्च
संयोगपरंपराया भोगाय संयुक्तोपि कैवल्याय पुनः संयुज्यत इति युक्तं ननु भवतु
नयोः संयोगो महदादिसर्गस्तु कुतस्त्य इत्यत आह तत्कृतः सर्गः संयोगो हि म
हदादिसर्गमन्तरेण न भोगाय न कैवल्याय च पर्याप्त इति संयोग एव भोगापवर्गा
र्थं सर्गं करोतीत्यर्थः सर्गक्रममाह प्रकृतेर्महानित्यादि प्रकृतेर्महान् ततो
ऽहंकारस्तस्माद्गणश्च षोडशकः तस्मादपि षोडशकात्पंचभ्यः पंचभूतानि २२ अपकृष्टेभ्यः
प्रकृतिरव्यक्तं महदहंकारौ वक्ष्यमाणलक्षणौ एकादशेन्द्रियाणि वक्ष्यमाणानि
पंचतन्मात्राणि च सोयं षोडशसंख्यापरिमितो गणः षोडशकः तस्मादपि षोड
शकादपकृष्टेभ्यः पंचतन्मात्रेभ्यः पंचभूतान्याकाशादीनि तत्र शब्दतन्मात्रादा
काशः शब्दगुणः शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद्वायुः शब्दस्पर्शगुणः।
शब्दस्पर्शतन्मात्रसहितात् रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं शब्दस्पर्शरू
पतन्मात्रसहितात् रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरू
परसतन्मात्रसहितात् गंधतन्मात्रसहितात् गंधतन्मात्रात् शब्दस्पर्शरू
परसगंधगुणा पृथिवी जायत इति अव्यक्तं तावत् सामान्यतो लक्षितं तद्वि
परीतमित्यनेन विशेषतस्तु लक्ष्यमकाशकमित्यादिना व्यक्तमपि सा

सान्वतो लक्षितं हेतुमदनित्यमित्यादिना संप्रति विवेकज्ञानोपयोगितया व्यक्तवि
शेषं बुद्धिं लक्षयति अध्यवसायो बुद्धिरिति अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्व
र्यं सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तं २३ अध्यवसायो बुद्धिः अध्यवसाय इति
क्रियाक्रियावतोरभेदविवक्षया सर्वो व्यवहर्त्ता आलोच्य मत्वा अहमत्राधिकृत इत्य
भिमन्यमानः कर्त्तव्यमेतन्मयेत्यध्यवस्यति ततश्च प्रवर्त्तत इति लोकप्रसिद्धं तत्र
योयं कर्त्तव्यमिति निश्चयः चितिसंनिधानादापन्नचैतन्याया बुद्धेः सोध्यवसायो बु
द्धेरसाधारणो व्यापारः तदभेदो बुद्धिः स च बुद्धेर्लक्षणं समानासमानजातीयव्यवच्छे
दो लक्षणार्थः तदेवं बुद्धिं लक्षयित्वा विवेकज्ञानोपयोगिनस्तस्या धर्मान् सात्त्विका
तामसानाह धर्मो ज्ञानं विराग ऐश्वर्यं सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तमि
ति धर्मोभ्युदयनिःश्रेयसहेतुः तत्र यागदानाद्यनुष्ठानजनितधर्मोभ्युदयहेतुः
अष्टांगयोगानुष्ठानजनितश्च निःश्रेयसहेतुः गुणपुरुषान्यताख्यातिर्ज्ञानं राग
प्रतिद्वंद्वी विरागः तस्य यतमानसंज्ञा व्यतिरेकसंज्ञा एकेंद्रियसंज्ञा वशीकारसं
ज्ञा इति चतस्रः संज्ञाः रागादयः कषायाश्चित्तवर्त्तिनस्तैरिंद्रियाणि यथास्वं विषयेषु
प्रवर्त्तंते ‸ [illegible] ति विषयेष्विंद्रियाणीति तत्परिपाचनायारंभः प्रयत्नोय
तमानसंज्ञा परिपाचने चानुष्ठीयमाने केचित्कषायाः पक्वाः पच्यंते च केचित् तत्रैवं
पूर्वापरभावे सति पक्ष्यमाणेभ्यः कषायेभ्यः पक्वानां कषायाणां व्यतिरेकेणावधा

‸ तानि मा प्रवर्त्त

सां॰
त्व॰
२१

यणां व्यतिरेकसंज्ञा इंद्रियप्रवर्त्तनासमर्थतया पक्वानामौत्सुक्यमात्रेण मनसि व्यवस्था
नमेकेंद्रियसंज्ञा औत्सुक्यमात्रस्यापि निवृत्तावुपस्थितेष्वपि दिव्यादिव्येषु विषयेषु या संज्ञा
त्रयात्पराचीना सा वशीकारसंज्ञा यामत्र भगवान् पतंजलिर्वर्णयांचकार दृष्टानु
श्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति सोयं बुद्धिधर्मो विराग इति ऐ
श्वर्यमपि बुद्धिधर्मो यतो अणिमादिप्रादुर्भावः तत्राणिमा भवत्यणुः यतः शिलाम
प्यनुविशति लघिमा भवति लघुः यतः सूर्यमरीचीनवलंब्य सूर्यलोकं याति महि
मा महान् भवति येन समस्तब्रह्मांडे व्याप्तिमनुभवति गरिमा गुरुर्भवति येन मशकमात्र
शरीरो गजशतैरपि नोत्थापयितुं शक्यते प्राप्तिरंगुल्यग्रेण स्पृशति चंद्रमसं प्रा
काम्यमिच्छानभिघातः यतो भूमावुन्मज्जति निमज्जति यथोदके ईशितं भूतभौतिका
नां प्रभवत्वं वशानामीष्टे वशित्वं भूतभौतिकं वशीभवति यत्र वर्ण्यमत्र च कामा
वसायित्वं सत्यसंकल्पता यथास्य संकल्पो भवति तथैव भूतानि भवंति अ
न्येषां निश्चया निश्चेयमनुविधीयते योगिनस्तु निश्चेया पदार्था निश्चय
मिति चत्वारः सात्विका बुद्धिधर्माः तामसास्तु तद्विपरीताः बुद्धिधर्माः अधर्मा
ज्ञानावैराग्यानैश्वर्याभिधानाश्चत्वार इत्यर्थः अहंकारस्य लक्षणमाह अभिमा
नोहंकारस्तस्माद्द्विविधः प्रवर्त्तते सर्गः एकादशकश्च गणस्तन्मात्रपंचकं।

भूम

उत्पत्तिस्थितिना शानां

वशित्वं

निश्चयानु सारिणः

२२

चैव २४ अभिमानोहंकारः यत्तावदालोचितं मतं च तत्राहमधिकृतः शक्तः खल्वह
मत्र मदर्थाएवामी विषयाः मत्तो नान्यो त्राधिकृतः कश्चिदस्ति अतोयमहमस्मी।
तियोभिमानः सोहंकारः असाधारणत्वादहंकारः तमुपजीव्य हि बुद्धिरध्यवस्यति क
र्त्तव्यमेतन्मयेति तस्य कार्यभेदमाह तस्माद्द्विविधः प्रवर्त्तते सर्ग इति प्रकारद्वय सां० ५४
माह एकादशकश्च गण इन्द्रियादयः तन्मात्रपंचकश्चैव द्विविध एव सर्गो हं।
कारान्नान्यः स्यादिति विवेचनेनावधारयति २५ स्यादेतत् अहंकारादेकरूपा
त् कारणात् कथं प्रकाशप्रजडौ विलक्षणौ गणौ भवत इत्यत आह सात्विक ए
कादशकः प्रवर्त्तते वैकृतादहंकारात् भूतादेस्तन्मात्रः स तामसस्तैज
सादुभयं २५ सात्विक एकादशकः प्रवर्त्तते वैकृतादहंकारात् भूतादेस
न्मात्रः स तामस इति प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सा
त्विको वैकृतात् सात्विकादहंकारात् प्रवर्त्तते भूतादेस्त्वहंकारात्ता
मसात्तन्मात्रगणः प्रवर्त्तते कस्मात् यतः स तामसः एतदुक्तं भव।
ति यद्यप्येकोहंकारस्तथापि गुणभेदोद्भवाभिभवाभ्यां भिन्नं कार्यं करो।
तीति ननु यदि सत्वतमोभ्यामेव सर्वकार्यं जन्यते तर्हि किं चिकारेण

यते ४

सां॰
का॰
२२

रणमेकमेतत्पुन आह तैजसादुभयं तैजसाद्राजसात्तस्मादुभयं गणद्वयं भव
ति यद्यपि राजसस्य न कार्यान्तरमस्ति तथापि सत्त्वतमसी स्वयमक्रिये समर्थे न का
र्यं कुरुतः रजसस्तु चलत्वात् यदा चालयति तदा स्वकार्यं कुरुत इति उभयस्मिन्न
पि कार्ये सत्त्वतमसोः क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति तन्मध्ये रज
२ सूज इत्यर्थः २५ सात्त्विकमेकादशकमाख्यातं तत्र सेन्द्रियदशकं तावदाह
बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि वाक्पाणिपादपायूप
स्थानि कर्मेन्द्रियाण्याहुः २६ सात्त्विकाहंकारोपादानत्वमिन्द्रियत्वं तच्च
द्विविधं बुद्धीन्द्रियं कर्मेन्द्रियं च उभयमप्येतदिन्द्रस्यात्मनश्चिह्नत्वा
दिन्द्रियमुच्यते तानि च स्वसंज्ञाभिः चक्षुरित्यादिभिरुक्तानि तत्र रू
पग्रहलिङ्गं चक्षुः शब्दलिङ्गं श्रोत्रं गन्धग्रहणलिङ्गं घ्राणं रसग्रह
णलिङ्गं रसनं स्पर्शग्रहणलिङ्गं त्वक् वागादीनां कार्यं वक्ष्यति
एकादशमिन्द्रियमाह उभयात्मकमत्र मनः संकल्पकमिन्द्रि
यं च साधर्म्यात् गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च २७
एकादशसु इन्द्रियेषु मध्ये मन उभयात्मकं बुद्धीन्द्रियं कर्मेन्द्रियं च

न्द्रुपेल हि त्वे धा)

चक्षुरादीनां वागादीनां च मनोऽधिष्ठितानां स्वस्वविषयेषु प्रवृत्तेः न दृष्टादी
रणा धर्मेण लक्षयति संकल्पकमत्र मन इति आलोचितमि।
न्द्रियेण वस्त्विदमिति संमुग्धं इदमेवं नैवमिति सम्यक् कल्पयति
नियम्य दर्शयति विशेषणविशेष्यभावेन विवेचयतीति यावत्।
यथाहुः संमुग्धवस्तुमात्रं तु प्राक् गृह्णन्त्यविकल्पितं तत्सा।
मान्यविशेषाभ्यां कल्पयन्ति मनीषिणः तथा अस्ति ह्यालोच। स्या)
नं ज्ञानं प्रथमं निर्विकल्पकं बालमूकादिविज्ञानसदृशं शुद्ध का६
वस्तुजं ततः परं पुनर्वस्तु धर्मैर्जात्यादिभिर्यया बुद्ध्यावसी
प्रत्यक्षत्वमा तत्वेन ॥ यते सापि प्रत्यक्षत्वेन सम्मतेति सोऽयं संकल्पलक्षणो व्यापारो
मनसः समानासमानजातीयाभ्यां व्यवच्छिन्दन् मनो लक्षयति स्यादे
तत् असाधारणव्यापारयोगित्वे यथा महदहंकारौ नेन्द्रियमेवं मनोऽप्यसाधार
णव्यापारयोगि नेन्द्रियं भवितुमर्हतीत्यत आह इन्द्रियं च अतः साधर्म्यात्

इंद्रियांतरैः सात्विकाहंकारोपादानत्वं च साधर्म्यं नत्विं[द्रि]यलिंगत्वं संघात[स्य] म
ह तच्चारीनामप्यात्मलिंगत्वेनेंद्रियत्वप्रसंगात् तस्मादेतद्व्युत्पत्तिनिमित्तमात्र
मिंद्रलिंगत्वं न तु प्रवृत्तिनिमित्तं अथ कथं सात्विकादहंकारादेकस्मादेकादशेंद्रि
याणीत्यत आह गुणपरिणामविशेषान्नानात्वं बाह्यभेदा[श्च] शब्दाद्युपभोगसं
वर्तकादृष्टसहकारिभेदात्कार्यभेदः अदृष्टभेदोपि गुणपरिणाम एव बाह्य
भेदाश्चेति दृष्टांतार्थं यथा बाह्यभेदास्तथैतदपीत्यर्थः २७ तदेवमेकादशेंद्रि
याणि स्वरूपत उक्त्वा एकादशानामसाधारणीर्वृत्तीराह शब्दादिषु पंचानामिति
शब्दादिषु पंचानामालोचनमात्रमिष्यते वृत्तिः वचनादानविहरणोत्सर्गानंदा
श्च पंचानां बुद्धींद्रियाणां संमुग्धवस्तुदर्शनमालोचनमुक्तं भवति वचनादानवि
हरणोत्सर्गानंदाश्च पंचानां कर्मेंद्रियाणां कंठताल्वादिस्थानमिंद्रियं वाक् तस्या
वृत्तिर्वचनं स्पष्टमन्यत् २८ अंतःकरणत्रयस्य वृत्तिमाह स्वालक्षण्यं वृत्तिस्त्रयस्येति
स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या सामान्यकरणवृत्तिः प्राणाद्या वायवः पं
च २९ स्वमसाधारणं लक्षणं वृत्तिर्येषां तानि स्वलक्षणानि महदहंकारमनांसि तेषां
भावः स्वालक्षण्यं तच्च स्वानि लक्षणान्येव तद्यथा महतोऽध्यवसायो अहंकारस्याभिमानः
संकल्पो मनस इति वृत्तिर्व्यापारः इतरैर्द्वि[विधा] साधारणत्वासाधारणत्वाभ्यामाह सैषा भव २३
त्यसामान्या असाधारणी सामान्यकरणवृत्तिः प्राणाद्या वायवः पंचसामान्या चासौ कर

बहिरिन्द्रियाणां करणत्रयस्य =५

दृष्टे प्रत्यक्षे   अदृष्टे परोक्षे

णा

णाद् निष्क्रामति त्रयाणामपि करणानां पंचवाय्वो वृत्तिर्जीवनं तद्भावे भावात् तदभा
वे भावात् तत्र प्राणो नासाग्रहृन्नाभिपादांगुष्ठवृत्तिः अपानः कृकाटिकापृष्ठपा
र्श्वपायूपस्थपार्ष्णिवृत्तिः समानो हृन्नाभिसर्वसंधिवृत्तिः उदानो हृत्कंठतालुमध
मूर्धवृत्तिः व्यानः त्वग्वृत्तिरिति पंच वायवः असाधारणी [illegible] वृत्तिरुक्ता [illegible]
मोपकारावा [illegible] ॥
चतुष्टयस्य वृत्तिः क्रमशश्च तस्या निर्दिष्टा दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विकाट
त्तिः उ० दृष्टे यथा महांधकारे विद्युत्संपाते [illegible] समावाच्य व्याघ्रमपि सुखमति
सन्निहितं पश्यति तदा खलु सत्यालोचनसंकल्पाभिमानाध्यवसाया युगपदेव
प्रादुर्भवंति यतस्ततस्तूर्णं तस्मात्स्थानादेकपदे पलायते क्रमशश्च यदा मंदालो
केषप्रसंगाद्वस्तुमात्रं संमुग्धमालोचयति अथ प्रणिहितमना [illegible] सपुरस
ज्जितज्यामंडलीकृतकोदंडः प्रचंडतरः पाटच्चरो यमिति निश्चिनोति अयं मामाप्नो
तीत्यभिमन्यते ततोध्यवसाति अपसरामीतः स्थानादिति परोक्षे तु त्रयस्य बा
ह्येंद्रियवर्जमन्तरिमाह तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः अन्तःकरणत्रय
स्य क्रमेणायुगपद्वा वृत्तिरिति दृष्टे एवं केवलमनुमानागमस्मृतिषु परोक्षेषु वेद

बाह्येन्द्रिय वृत्तिर्न भवति

अनुमानादिरूप

बहितिर्दि ... याहं का बुद्धिम बोधीनः

आकृतेः अभिप्रायः

नते २   यौर

स्रोत्व शंनप्रविकाम्प्रवर्त्तंते नान्यथा यथाहदृष्टेन याम्ब्रहदृष्टेमीति तेन। २० स्यादेतत् । चेन्न
एवं त्रयाणां वाप्तृतयो न तावन्मात्राधीनास्तेषां सदातनत्वेन वृत्तीनां सदोत्याद प्रसंगात् ।
को आकस्मिकत्वे तु वृत्तिसंकरप्रसंगो नियमहेतोरभावादित्यत आह स्वां स्वां प्रतिपद्य
२५ ते परस्परावृत्त हेतुकां वृत्तिं पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणं ॥ २१ स्रो
स्वां प्रतिपद्यंते परस्परावृत्तहेतुकां वृत्तिं करणानीति । यथा हि बहवः पुरुषाः शान्ती- ्रोषः
कयाष्टीकधानुष्ककार्पाणिकाः कृतसंकेताः परावस्कन्दाय प्रवृत्ताः तत्रान्यतमस्य
स्याकृतमवगम्यान्यतमः प्रवर्त्तते प्रवर्त्तमानस्तु शान्तीकः शान्तिमेवोपादत्ते न य
ष्ट्यादिकं एवं याष्टिकोऽपि यष्टिमेव न प्रासपादिकं तथान्यतमस्य करणस्याकूतात् स्वका
र्यकरणाभिमुख्यादन्यतमं करणं प्रवर्त्तते तत्र वृत्तेः सुहेतुमत्वान्न वृत्तिसंकर इत्युक्तं । २४
स्वां स्वां प्रतिपद्यंत इति स्यादेतत् याष्टिकादयश्चेतनत्वात् परस्याकूतमवग गम०
म्य प्रवर्त्तंत इति युक्तं करणानि त्वचेतनानि तस्मान्नैवं प्रवर्त्तितुमुत्सहंते तेषाम

कृतमलमित्यर्थः २

धिष्ठात्राकरणेनास्वरूपतामर्थ्यापयोगाभिज्ञेनभवितव्यमित्यतआह पुरुषार्थ
एवहेतुर्नकेनचित्कार्यतेकरणमिति भोगापवर्गलक्षणः पुरुषार्थएवानागताव
स्थः वस्थः प्रवर्त्तयतिकरणानि कृतमत्रतत्स्वरूपाभिज्ञेनकर्त्रा एतच्चवत्सविवृद्धिनि।
मित्तमित्यत्रोपपादयिष्यते नकेनचित्कार्यतेकरणमित्युक्तेन करणंविभजते क प्रेर्यते २
रणंत्रयोदशविधमिति करणंत्रयोदशविधंतदाहरणधारणप्रकाशकरं कार्यं
चतस्यदशधाहार्यंधार्यंप्रकाश्यंच ३२ इंद्रियाण्येकादशबुद्धिरहंकारश्चेतित्र
योदशप्रकारंकरणं कारकविशेषः करणं नचव्यापारावेशंविनाकारकत्वमिति
व्यापारावेशमाह तदाहरणधारणप्रकाशकरं यथायथं तत्रकर्मेंद्रियाणिवागादी
न्याहरंति यथास्वमुपाददते स्वव्यापारेणव्याप्नुवंतीतियावत् बुद्ध्यहंकारमनां
सितुस्ववृत्त्याप्राणादिलक्षणयाधारयंति बुद्धींद्रियाणितुप्रकाशयंति आ
हरणादिक्रियाणांसकर्मकतयाकिंकर्मकतिविधंचेत्यतआह कार्यंचतस्य

एवं तेषां दिव्यमदिव्यं च पुष्पादीनां २ [illegible] यथायथं [illegible] दिव्यादिव्यतया दशेति

ॐ त्रयोदशविधस्य करणस्य दशधा आहार्यं धार्यं प्रकाश्यं च आहार्यं व्याप्य कर्मेन्द्रि
सांख्य याणां पंचानां वचनादानविहरणोत्सर्गानंदाख्यं यथासंख्यं व्याप्य स्वे च दिव्यादिव्य। यथायथं
७४ तया दशधाहार्यं दशधा एवं धार्यमपि अंतःकरणत्रयस्य प्राणादिलक्षणया वृ।
त्त्या शरीरं तच्च पार्थिवादि पांचभौतिकं शब्दादीनां च पंचानां समूहः पृथिवी तेन च
दिव्या पंच दिव्यतया दशेति धार्यमपि दशधा एवं बुद्धीन्द्रियाणां च प्रकाश्यं दशधेति
३२ त्रयोदशविधकरणे वांतरविभागं करोति अंतःकरणं त्रिविधं दशधा बाह्यं करणं
त्रयस्य विषयाख्यं सांप्रतकालं बाह्यं त्रिकालमाभ्यंतरं करणं ३३ अंतःकरणं
त्रिविधं बुद्धिरहंकारो मन इति शरीराभ्यंतरवर्त्तित्वादंतःकरणं दशधा बाह्यमिं
द्रियं त्रयस्यांतःकरणस्य विषयाख्यं विषयमाख्याति विषयनिश्चयाभिमानसं २५
कल्पकर्तृत्वेषु द्वारीभवति तत्र बुद्धीन्द्रियाण्यालोचनेन कर्मेन्द्रियाणि तु यथा एम.
स्वं व्यापारेण बाह्याभ्यंतरयोः करणयोर्विशेषांतरमाह सांप्रतकालं बाह्यं। १

रविकिरणाद्युपाधिभेदैरित्यर्थः   ऽनेककालाद्यनुरूपा इत्यर्थः ४

त्रिकालमाभ्यंतरंकरणं सांप्रतकालंवर्त्तमानकालंबाह्यमिंद्रियं वर्त्तमानसमीपम
नागतमतीतमपिवर्त्तमानं अतोवागपिवर्त्तमानकालविषयाभवति त्रिकालमाभ्यं
तरंकरणं तद्यथा नदीपूरभेदादभूद्वृष्टिः अस्तिधूमादग्निरिहनगनिकुंजे असत्तु
पघाने पिपीलिकांडसंचाराद्भविताद्वृष्टिरिति तदनुरूपाश्चसंकल्पाभिमानाध्य
वसायाभवंति कालश्चवैशेषिकाभिमतएकोनानागतादिभेदंप्रवर्त्तयितुमर्ह
ति तस्मादयंयैरुपाधिभेदैरनागतादिभेदंप्रतिपद्यतेसंतुतएवोपाधयोनागता ५
दिव्यवहारहेतवः कृतमत्रांतर्गडुनाकालेनेति सांख्याचार्याः तस्मान्नकालरू
पतत्वांतराभ्युपगमइति ॥ सांप्रतिकालानांबाह्येंद्रियाणांविषयंविवेचयति ॥
बुद्धींद्रियाणीति बुद्धींद्रियाणितेषांपंचविशेषाविशेषविषयाणि वाग्भवति
कर्णपादपा
रूपस्थानि
स्थूलं
शब्दविषयाशेषाणितुपंचविषयाणि तेषांदशानामिंद्रियाणांमध्येबुद्धीं
द्रियाणिपंचविशेषाविशेषविषयाणि विशेषाश्चस्थूलाः शब्दादयः शांतघो
रमूढाः पृथिव्यादिरूपाः अविशेषास्तन्मात्राणिसूक्ष्माः शब्दादयः मात्रग्र

सांख्य २८

हणेन स्थूलभूतभावमपाकरोति विशेषाश्चाविशेषाश्च विशेषाविशेषार्थाः एव विषया
येषां बुद्धीन्द्रियाणां तानि तथोक्तानि तत्रोर्ध्वरेतसां योगिनां च श्रोत्रं शब्दतन्मात्रविषयं
स्थूलशब्दविषयं च अस्मदादीनां तु स्थूलशब्दविषयमेव एवं तेषां त्वक् स्थूलसूक्ष्म
स्पर्शविषया अस्मदादीनां तु स्थूलस्पर्शविषयैव एवं चक्षुरादयोपि तेषामस्मदादी
नां रूपादि स्थूलसूक्ष्मेषु द्रष्टव्याः एवं कर्मेन्द्रियेषु मध्ये वाग्भवति स्थूलशब्दविषया
तद्धेतुत्वात् न तु शब्दतन्मात्रस्य हेतुः तस्याहंकारहेतुत्वेन वागेन्द्रियेण सहैककारण
त्वात् शेषाणि तु चत्वारि पाणिपादपायूपस्थानि पंचविषयाणि पाण्याद्याहार्याणां
घटादीनां पंचशब्दाद्यात्मकत्वादिति साम्प्रतं त्रयोदशानां करणेषु मध्ये केषांचिद्गुण
भावं केषांचित्प्रधानभावं सहेतुकमाह सान्तःकरणा बुद्धिः सर्वविषयमवगाहते २८
यस्मादिति सान्तःकरणा बुद्धिः सर्वविषयमवगाहते यस्मात् तस्मात्त्रिविधं कर
णं द्वाराणि शेषाणि ३५ तस्मात्त्रिविधं करणं द्वारि प्रधानं शेषाणि करणानि बा
ह्यानि द्वाराणि गौणानि नैरुपनीतं मनोहंकारबुद्धिः सर्वं यस्माद्विषयमृत

योगिनां शब्दविषया तुक राम ३ द्वारि स्थूलशब्द याणि विषयं

गाहतेऽध्यवस्यतितस्मात्बाह्यानींद्रियाणिद्वाराणिद्वारवंतीचसंतः करणबुद्धिरिति ॥
नकेवलंबाह्येंद्रियाण्यपेक्ष्यप्रधानंबुद्धिरपितुयेहंकारमनसीद्वारिणीतेप्यपेक्ष्यबुद्धिः
प्रधानमित्याह एतेप्रदीपकल्पाइति एतेप्रदीपकल्पाः परस्परविलक्षणागुणविशेषाः॥
कृत्स्नंपुरुषस्यार्थंप्रकाश्यबुद्धौप्रयच्छंति ३६ यथाहिग्रामाध्यक्षाः कुटुंबिकेभ्यःकरमादा
यविषयाध्यक्षायप्रयच्छंति विषयाध्यक्षः सर्वाध्यक्षायसर्वंभूपतये तथाबाह्येंद्रियाण्या
लोच्यमनसेसमर्पयंति मनश्चसंकल्प्याहंकाराय अहंकारोभिमत्यबुद्धौसर्वाध्यक्षभूता
यै तदिदमुक्तं पुरुषस्यार्थंप्रकाश्यबुद्धौप्रयच्छंतीति बाह्येंद्रियमनोहंकाराश्चगुण
विशेषाः गुणानांसत्वरजस्तमसांविकाराः परस्परविरुद्धधर्माणोपिपुरुषार्थेनभोगा
पवर्गलक्षणेनएकवाक्यतांनीताः यथावर्तितैलवह्नयःसंभूयतापनयनेनरूपप्रका त
शायमिलिताः प्रदीपएवमेतेगुणविशेषाइतियोजना कस्मात्पुनर्बुद्धौप्रयच्छंति।
ननुबुद्धिरहंकारायद्वारिणोमनसेवेत्यतआह सर्वंप्रत्युपभोगंयस्मादिति॥ ॥

तस्मात्तैः [illegible] प्रधानं ३

उ०

सर्वंप्रत्युपभोगंयस्मात्पुरुषस्यसाधयतिबुद्धिः सैवचविशिनष्टिपुनःप्रधानपुरुषांतरंसू
सांख्य क्ष्मं ३७ पुरुषार्थस्यप्रयोजनत्वात् तस्माद्यस्मात्तस्मात्साधनंतत्प्रधानंबुद्धिश्चास्यसाक्षात्सा पुरुषार्थस्य
धनं यथासर्वाध्यक्षःसाक्षाद्राजार्थसाधनंतथाप्रधानं इतरेतुग्रामाध्यक्षादयस्तत्प्र
२९ तिगुणभूताः बुद्धिर्हिपुरुषसन्निधानात् तच्छायापत्त्यातद्रूपेवसर्वविषयोपभोगंय
स्मात्पुरुषस्यसाधयति सुखदुःखानुभवोभोगः सचबुद्धौबुद्धिश्चपुरुषरूपेवेतिपुरुषमु
पभोजयति अर्थालोचनार्थसंकल्पार्थाभिमानाश्चतत्तद्रूपपरिणामेनबुद्धौउपसंक्रांता
इति इंद्रियादिव्यापाराअपिबुद्धेरेवस्वव्यापारेणाध्यवसायेनसहव्यापारीभवंति यथा
स्वसैन्येनसहग्रामाध्य[illegible]ताद्विसैन्यंसर्वाध्यक्षस्यभवति सर्वंशब्दादि
कंप्रतियःउपभोगःपुरुषस्यतंसाधयति ननुपुरुषस्यसर्वविषयोपभोगसंपादिका २९
यदिबुद्धिस्तर्हिनिर्मोक्षइत्यतआह पश्चात्प्रधानपुरुषयोरंतरंविशेषंविशिनष्टिकरो सम
ति यथौदनपाकंपवनीति ननुप्रधानपुरुषयोरंतरस्यकृतकत्वात् अनित्यत्वं॥
तत्कृतकस्यमोक्षस्यचेतिचेदतआह॥ विशिनष्टिप्रधानंसविकारमन्यत्॥ ॥

अहमन्य इति विद्यमानमेवान्तरमविवेकेनाविद्यमानमिव बुद्धिर्बोधयति ननु करोति येनानि
त्यत्वमित्यर्थः करणं च प्रतिपादनं अनेनापवर्गः पुरुषस्यार्थो दर्शितः तदेवं करणानि विभ
ज्यवि ष नि ष्यान्विभजते तन्मात्राण्यविशेषास्तेभ्यो भूतानि पंचपंचभ्यः एते स्मृता
विशेषाः शान्ता घोराश्च मूढाश्च ३८ अविशेषाः शब्दादितन्मात्राणि सूक्ष्माणि न चैषां शा
न्तादिरस्ति उपभोगयोग्यो हि विशेष इति मात्राशब्दार्थः अविशेषानुक्त्वा विशेषान्वक्तुमेषा
मुत्पत्तिमाह तेभ्यो भूतानि पंचपंचभ्यः तेभ्यः तन्मात्रेभ्यो यथासंख्यमेकद्वित्रिचतुःपंच
भ्यो भूतान्याकाशानिलानलसलिलावनिरूपाणि पंच पंचभ्यस्तन्मात्रेभ्यः स्यादेते
षां भूतानां उत्पत्तिर्विशेषेषु किमायातमित्यत आह एते स्मृता विशेषाः कुतः शान्ता
घोराश्च मूढाश्च च एको हेतो द्वितीयः चः समुच्चये यस्मादाकाशादिषु स्थूलेषु स
त्त्वप्रधानतया केचिच्छान्ताः सुखाः प्रकाशा लघवः केचिद्रजःप्रधानतया घोरा दुः
खा [illegible] अनवस्थिताः केचित्तमःप्रधानतया मूढा विषण्णा गुरवः ते त्वमी
परस्परव्यावृत्त्यानुभूयमाना विशेषा इति [illegible] स्थूला इति चोच्यन्ते ॥ तन्मा

सांख्य २८

28

त्रारिणवस्मदादिभिः परस्परं व्याहृतज्ञानिनानुभूयंत इत्यविशेषा इति च सूक्ष्मा इति चोच्यं
ते विशेषाणामवांतरविशेषप्रकारमाह सूक्ष्मा मातापितृजा सह प्रभूतैः त्रिधा वि
शेषाः स्युः सूक्ष्मास्तेषां नियता मातापितृजा निवर्त्तंते ३९ त्रिविधा विशेषाः स्युस्तान्वि
शेषप्रकारानाह सूक्ष्मा मातापितृजाः सह प्रभूतैः सूक्ष्माः सूक्ष्मदेहाः मातापितृजाः
षाट्कौशिकाः तत्र मातृतो लोमशोणितमांसानि पितृतः स्नाय्वस्थिमज्जान इति
षट्कोशाः पञ्चभूतानि महांति भूतानि प्रभूतानि तैः सह सूक्ष्मशरीरमेको विशेषः॥
मातापितृजो द्वितीयः महाभूतानि तृतीयः महाभूतवर्गे च घटादीनां निवेश इति ॥
सूक्ष्ममातापितृजयोर्देहयोर्विशेषमाह सूक्ष्मास्तेषां विशेषाणां मध्ये ये ते नियताः
कीट
मातापितृजा निवर्त्तंते रसांता वा भस्मांता वा विडंता वेति सूक्ष्मशरीरं विभजते॥ २८
पूर्वोत्पन्नमसक्तमिति पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यंतं संसरति नि राम-
रुपभोगं भावैरधिवासितं लिंगं ४० पूर्वोत्पन्नं प्रधानेनादिसर्गे प्रतिपुरुषमेकैक २
मुत्पादितं असक्तं अव्याहतं शिलाम प्यनुविशति नियतं आचादिमहास
प्र

र्गादौ च महाप्रलयादवतिष्ठते महदादि सूक्ष्मपर्यंतं महदहंकारैकादशेंद्रियपंचतन्मा
त्रपर्यंतं एतेषां समुदायः सूक्ष्मशरीरं शांतघोरमूढैरिंद्रियैरन्वितत्वाद्विशेषः नन्व
स्त्येन देवशरीरं भोगायतनं पुरुषस्य कृतं षा ... षाट्कौशिकेन दृश्यमानेन शरीरेणेत्यत
आह संसरति उपात्तमुपात्तं षाट्कौशिकं शरीरं जहाति हेयं हेयं चोपात्ते कस्मान्निरु
पभोगं यतः षाट्कौशिकं शरीरं विना सूक्ष्मशरीरं निरुपभोगं तस्मात्सूक्ष्मं शरीरं संसर
ति ननु धर्माधर्मनिमित्तः संसारः न च सूक्ष्मशरीरस्यास्ति तद्योगः तत्कथं संसरतीत्य
त्यत आह भावैरधिवासितं धर्माधर्मज्ञानाज्ञानवैराग्यावैराग्यैश्वर्यानैश्वर्याणि
भावास्तदन्विता बुद्धिस्तदन्वितं च सूक्ष्मशरीरमिति तदपि भावैरधिवासितं यथा
सुरभिचंपकसंपर्काद्वस्त्रं तदामोदवासितं भवति तस्माद्भावैरधिवासितत्वात्संसर
ति कस्मात्पुनः प्रधानमिव महाप्रलयेपि तच्छरीरं न तिष्ठतीत्यत आह लिंगं लयं
गच्छतीति लिंगं हेतुमत्त्वेन चास्य लिंगत्वमिति भावः स्यादेतत् बुद्धिरेव साहंकारं

सूक्ष्मं शरीमनित्यं भावत्वेसतिकार्यत्वात्

पं ४

द्रियाकस्मान्नसंसरतु इतेस्सूक्ष्मशरीरेणप्रमाणिकेनेत्यतआह चित्रंयथेति चित्रंयथा
श्रयमृतेस्थाण्वादिभ्योविनायथाछाया नद्दद्विनाविशेषैर्नतिष्ठति निराश्रयंलिंगं ॥ ४१ ॥
ॐ सांख्य २४ लिंगनात् ज्ञापनाद्बुध्यादयोलिंगं तदनाश्रयंनतिष्ठति जन्मप्रायणांतरालेबुध्यादयः पाराय
प्रत्युत्पन्नशरीराश्रयाः प्रत्युत्पन्नत्वतन्मात्रत्वेसतिबुध्यादित्वात् दृश्यमानशरीर
वर्त्तिबुध्यादिवत् विनाविशेषैरिति सूक्ष्मैः शरीरैरित्यर्थः आगमश्चात्रभवति अंगु
ष्ठमात्रंपुरुषंनिश्चकर्षयमोबलादिति अंगुष्ठमात्रत्वेनसूक्ष्मत्वमुपलक्षयति आत्मनो
निष्कर्षेभवात् सूक्ष्ममेवशरीरंपुरुषः तदपिपुरिस्थूलशरीरेशेतेइति एवंसूक्ष्म
शरीरास्तित्वमुपपाद्ययथासंसरतियेनचहेतुनातदुभयमाह पुरुषार्थेति पुरुषार्थ
हेतुकमिदंनिमित्तनैमित्तिकप्रसंगेन प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठतेलिंगं॥ २९
४२ पुरुषार्थेनहेतुनाप्रयुक्तंनिमित्तंधर्मादि नैमित्तिकंतेषुतेषुनिकायेषुयथाय
थंषाट्कौशिकशरीरग्रहः तद्धिधर्मादिनिमित्तप्रभवः निमित्तंचनैमित्तिकंचतत्त्वयः

प्रसंगः प्रकृतिः तयानटवद्व्यवतिष्ठते लिंगं सूक्ष्मशरीरं यथाहि नटस्तांतां भूमिकामादा
य[illegible]रामो वा अजातशत्रुर्वा वत्सराजो वा भवति एवं तत्तत्स्थूलशरीरग्रहणाद्देवो वा मनु
ष्यो वा पशुर्वा वनस्पतिर्वा भवति सूक्ष्मशरीरमित्यर्थः कुतः पुनरस्येदृशो महिमेत्यत आ
ह प्रकृतेर्विभुत्वयोगात् तथा च पुराणे वैश्वरूप्यात्प्रधानस्य परिणामोयमद्भुत इति नि
मित्तनैमित्तिकप्रसंगेनोक्तं तत्र निमित्तनैमित्तिके विभजते सांसिद्धिकाश्चेति सांसि
द्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च क
ललाद्याः [illegible] प्राकृतिकाः [illegible] निमित्त[illegible] [illegible]
[illegible] वैकृतिका नैमित्तिकाः [illegible] स्वाभाविका भावाः सांसिद्धिकाः तथा हि सर्गादा
वादिविद्वान् तत्र भगवान् कपिलो महामुनिर्धर्मज्ञानवैराग्यैश्वर्यसम्पन्नः प्रादुर्बभूवेति स्मरन्ति
वैकृताश्च भावा असांसिद्धिकाउपायानुष्ठानेनोत्पन्नाः यथा प्राचेतसप्रभृतीनां परमर्षी
णां एवमधर्माज्ञानवैराग्यानैश्वर्याण्यपि कार्यं शरीरं तदाश्रयिणः तस्यावस्थाः कल
लबुद्बुदमांसपेशी कोडशिरोबाह्वाद्याद्यंगप्रत्यंगव्यूहा गर्भस्थस्य भवंति ततोनि
३ चकारेणानुक्तसमुच्चायकेनासांसिद्धिकपरिग्रहः॥

दि तु

गे गतस्य बाल्यकौमारयौवनवार्धकानीति अवगतानि निमित्तनैमित्तिकानि कृतमस्य तु

सां निमित्तस्य कतमं नैमित्तिकमित्यत आह धर्मेणेति धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यध

त्व र्मेण ज्ञानेन चापवर्गो विपर्ययादिष्यते बंधः ॥४४॥ धर्मेण गमनमूर्ध्वं द्युप्रभृतिलोकेषु गमन

३९ मधस्ताद्भवत्यधर्मेण तलादिषु ज्ञानेन चापवर्गः तावदेव प्रकृतिरारभते न यावद्वि

वेकख्यातिं करोति अथ विवेकख्यातौ सत्यां कृतकृत्यतया विवेकख्यातिमंतं पुरुषं प्रति

अज्ञानात निवर्त्तते यथाहुः विवेकख्यातिपर्यंतं विज्ञेयं प्रकृतिचेष्टितमिति विपर्ययादतत्त्वज्ञाना

३९ दिष्यते बंधः स च त्रिविधः प्राकृतिको वैकारिको दाक्षिणश्च तत्र प्रकृतावात्मज्ञा

नात् ये प्रकृतिमुपासते तेषां प्राकृतिको बंधः यथा वायुपुराणे प्रकृतिलयान् प्रतीद ३०

मुच्यते पूर्णं शतसहस्रं तु तिष्ठंत्यव्यक्तचिंतका इति वैकारिको बंधस्तेषां ये विकारा रम

नेव भूतेंद्रियाहंकारबुद्धीः पुरुषबुद्ध्योपासते तान् प्रतीदमुच्यते यथा दश म

न्वंतराणीह तिष्ठंतींद्रियचिंतकाः भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः ॥ १

बुद्ध्युपासकाः

तिबलत्मीविदेहायेषां वैकृतिको बंधः इति इष्टापूर्तेन दाक्षिणः पुरुषतत्त्वानभिज्ञो
हि इष्टापूर्तकारी कामोपहतमना बध्यत इति ४४ वैराग्यात्प्रकृतिलयः सं
सारो भवति राजसाद्रागात् ऐश्वर्याद विघातो विपर्ययात्तद्विपर्यासः ४५ +४ लयः प्रकृति
वैराग्यात्प्रकृतिलयः पुरुषतत्त्वानभिज्ञस्य वैराग्यमात्रात्प्रकृतिग्रहणेन प्र
कृति महदहंकारभूतेन्द्रियाणि गृह्यन्ते तेष्वात्मबुद्ध्योपास्यमानेषु लयः
कालान्तरेण च पुनराविर्भवन्ति इति संसारो भवति राजसाद्रागात् राज
सादित्यनेन रजसो दुःखहेतुत्वात् संसारस्य दुःखिता सूचिता ऐश्वर्याद
विघात इति अविघात इति इच्छाया ईश्वरो हि यदेवेच्छति तदेव करोति
विपर्ययादनैश्वर्यात्तद्विपर्यासः सर्वत्रेच्छाविघात इत्यर्थः बुद्धिधर्मा
न्धर्मादीन् अष्टौ भावान् समासव्यासाभ्यां मुमुक्षूणां हेयोपादेयभावं द
र्शयितुं प्रथमं तावत् समासमाह एष इति एष प्रत्ययसर्गो विपर्य

॥ ६५ ॥ [illegible]

सां०त० याशक्तितुष्टिसिद्ध्याख्यः गुणवैषम्यविमर्दात्तस्य च भेदास्तु पंचाशत् ४६ प्रतीयते
ऽनेनेति प्रत्ययो बुद्धिस्तस्याः सर्गः तत्र विपर्ययोऽज्ञानमविद्या सोऽपि बुद्धिधर्मः अ
२ शक्तिरपि करणवैकल्यहेतुका बुद्धिधर्म तुष्टिसिद्धी वक्ष्यमाणलक्षणे बुद्धिध
३१ र्मावेव तत्र विपर्ययाशक्तितुष्टिषु यथायोगं सिद्धिसाधनानां धर्मादीनां ज्ञानवर्ज
= मन्तर्भावः सिद्धौ च ज्ञानस्येति व्यासमाह तस्य भेदास्तु पंचाशत् कस्मात् गुण
सत्त्वरजस्तमसां वैषम्यविमर्दात् गुणानां वैषम्यमेकैकस्याधिकबलता द्वयोर्द्वयोर्वा एकै
कस्य न्यूनबलता द्वयोर्द्वयोर्वा नेच न्यूनाधिको मध्यमाधिकमात्रतया
यथाकार्यमुन्नीयेते तदिदं गुणानां वैषम्यं तेनोपमर्द एकस्य न्यूनस्य द्वयो
र्वाऽभिभवः तस्मात्तस्य भेदाः पंचाशदिति ४६ तानेव पंचाशद्भेदान्नाम
यति पंचेति पंच विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात् अष्टा
विंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ४७ अविद्यास्मितारागद्वेषाभिनिवे ३
शा यथासंख्यं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञकाः पंच विप
र्ययविशेषाः विपर्ययप्रभवानामप्यस्मितादीनां विपर्ययस्वभावत्वात् यद्यद्वि

संप्रति पंचानां विपर्ययभेदानामवान्तरभेदमाह ॥ भेदस्तमसोष्टविधो मोहस्येति
भेदस्तमसोष्टविधो मोहस्य च दशविधो महामोहः तामिस्रोष्टादशधा तथा भवत्यन्धतामिस्रः ४८ भेदस्त
मसो विद्याया अष्टविधः अष्टस्वव्यक्तमहदहंकारपंचतन्मात्रेष्वनात्मस्वात्मबुद्धिरविद्या तमः तस्याष्ट
विधविषयत्वादष्टविधत्वं मोहस्य चात्राप्यष्टविधो भेद इति चेनानुषज्यते देवा ह्यष्टविधमैश्वर्यमासा
द्यामृताभिमानिनो णिमादिकमात्मीयं शाश्वतिकमभिमन्यन्त इति सेयमस्मिता मोहोष्टविधैश्वर्यविष दिव्या
यत्वादष्टविधः दशविधो महामोहः शब्दादिषु पंचसु दिव्यादिव्यतया दशविधेषु विषयेषु रंजनीयेषु रागआ
सक्तिर्महामोहः स च दशविधविषयत्वाद्दशविधः तामिस्रो द्वेषोष्टादशधा शब्दादयो दश विषया रंज
नीयाः स्वरूपत ऐश्वर्यं त्वणिमादिकं न स्वरूपतो रंजनीयं किंतु रंजनीयशब्दाद्युपायाः ते च शब्दाद
य उपस्थिताः परस्परेणोपहन्यमानास्तदुपायाश्चाणिमादयः स्वविषये नैव कोपनीया भवंतीति ॥ इपेण
नहि द्वयोर्द्वे शब्दादिभिः दशभिः सहाणिमाद्यष्टकमष्टादशधेति तामिस्रोष्टादशविषयत्वादष्टादशधे
ति तथा भवत्यंधतामिस्रः अभिनिवेशस्त्रासोंधतामिस्रः तथेत्यनेनाष्टादशधेत्यनुषज्य
ते देवाः खल्वणिमादिकमष्टविधमैश्वर्यमासाद्य दश शब्दादीन् भुंजानाः शब्दादयो भोग्या
स्तदुपायाश्चाणिमादयोस्माकमसुरादिभिरुपघानयिष्यन्त इति बिभ्यति तदिदं भयमभिनिवे
शोंधतामिस्रोष्टादशविषयत्वादष्टादशविध इति । सोयं पंचविधविकल्पो विपर्ययो वृंतर

४९

भेदास्तुष्टिसिद्धीनामिति तदेवं पंचविपर्ययभेदानुक्त्वाष्टविंशतिभेदामशक्तिमाह एकादशेति एकादशेंद्रि
ॐ यवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा सप्तदशधा वै बुद्धेर्विपर्ययात्तुष्टिसिद्धीनां ४९ एकादशेंद्रियवधाः ॥
सो.त्व बाधिर्यंकुष्ठितान्धत्वंजडताजिघ्रता तथा मूकताकौण्यपंगुत्वक्लैब्योदावर्त्तमंदताः यथासंख्यंश्रो
३५ त्रादीनामिंद्रियाणांवधाः एतावतैवबुद्धेरशक्तिः स्वव्यापारे भवति तथाचैकादशहेतुकादेका
दशधाबुद्धेरशक्तिरुच्यते हेतुहेतुमतोरभेदविवक्षयाचसामानाधिकरण्यं तदेवमिंद्रियवध
द्वारेणबुद्धेरशक्तिमुक्त्वास्वरूपतोऽशक्तीराह सह बुद्धिवधैरिति कतिबुद्धेः स्वभावतोवधाइत्य
32 तआह सप्तदशधाचबुद्धेः कुतः विपर्ययात्तुष्टिसिद्धीनां तुष्टयोनवधेतितद्विपर्ययान्तत्रि
रूपणान्नवधाभवंति एवंसिद्धयोऽष्टाविति तद्विपर्ययात्तन्निरूपणादष्टौभवंतीति। तुष्टिर्नव
धेत्युक्तास्ताः परिगणयति आध्यात्मिकाइति आध्यात्मिकाश्चतस्रः प्रकृत्युपादानकालभा
ग्याख्याः बाह्याविषयोपरमात्पंचनवतुष्टयोऽभिमताः ५० प्रकृतिव्यतिरिक्तआत्मास्ती
तिप्रतिपद्ययस्यश्रवणमननादिनाविवेकसाक्षात्कारायनसदुपदेशात्तुष्टोयोनप्रयतते। ३२
तस्यचतस्रआध्यात्मिकास्तुष्टयोभवंति प्रकृतिव्यतिरिक्तमात्मानमधिकृत्ययस्मात्तास्तुष्टय एम.
तस्मादाध्यात्मिकाः कास्ताइत्यतआह प्रकृत्युपादानकालभागाख्याः प्रकृत्यादिराख्या १
यासांता

यत्तो न भवति ५

६८

स्तयोक्ताः तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशः विवेकसाक्षात्कारो हि
प्रकृतिपरिणामभेदस्तं च प्रकृतिरेव करोतीति कृतं ते ध्यानाभ्यासेन तस्मादेव
मेवास्स्व वत्सेति येयमुपदेशस्तस्य शिष्यस्य तुष्टिः प्रकृतौ सा तुष्टिः प्रकृ
त्याख्याम्भ उच्यते यातु प्रकृतापि विवेकख्यातिर्न सा प्रकृतिमात्राद्भ
वति माभूत्सर्वस्य सदा तन्मात्रस्य सर्वान्प्रविशेषात् प्रव्रज्यायास्तु
सा भवति तस्मात्प्रव्रज्यामुपाददीथाः कृतं ते ध्यानाभ्यासेन
आयुष्मन्नित्युपदेशात्तुष्टिः सा उपादानाख्या सलिलमुच्य
ते यातु प्रव्रज्यापि न सद्यो निर्वाणदेति सैव कालपरिपाकमपेक्ष्य
सिद्धिं [illegible] विधास्यति अलमुत्तप्ततया तवेत्युपदेशात्तुष्टिः
साकालाख्या ओघ उच्यते यातु न प्रकृतेर्न कालान्नाप्युपादानाद्वि

कख्यातिरपितुभाग्यादेवअतएवमंदालसापत्यानिअतिवाला
३५ निमातुरुपदेशमात्रादेवविवेकख्यातिमंतिमुक्तानिबभूवुः त
स्माद्भाग्यमेवहेतुर्नान्यादिति इत्युपदेशायातुष्टिः साभाग्याख्ये
तुष्टिर्वृष्टिरुच्यते वाह्याद्शयानि वाह्यास्तुष्टयः शब्दादिविष
योपरमात्पंचयांवल्वनात्मनः प्रकृतिमहदहंकारादीना
त्मत्वाभिमन्यमानस्यवैरागेसतितुष्टयस्तावाह्याः अनात्मज्ञा
सत्य नाभावेनात्मानमाधिकृत्यप्रवृत्तेरितिताश्चवैरागेसतिसंभवंति
तुष्टयइतिवैराग्यस्यपंचहेतुकात्वाहेराग्याणिपंचतत्यच ३३
त्वात्तुष्टयःपंचैव परमपतेनेनत्युपरमोवैराग्यंविषयादु

परमः विषयोपरमः विषया भोग्याः शब्दादयः पंचैव परमा अयि पंचतत्र याहि अर्जी
नरक्षणक्षय भोग हिंसादोषदर्शनहेतुजन्मानः पंचोपरमा भवंतीति तत्र याहि सेवा
दयो धनार्जनोपायाः तेच सेवकान् दुःखाकुर्वंतीति दृष्ट्वा दुराध्मरह्वासस्पदं ड्सितं डाई
चङ्गजां वेदनां भावयन प्राज्ञः कः सेवा स्वनुषज्जते एवमन्येप्यर्जनोपायाः दुःखा इ
ति विषयोपरमे या तुष्टिः सैषा पारमुच्यते तत्र याऽर्जितं धनं राजैकागारिकाग्निज
लोघादिभ्यो विनंक्ष्यतीति तद्रक्षणे महत् दुःखमिति भावयतो विषयोपर
मे या तुष्टिः सा द्वितीया सुपारमुच्यते तथा महता यासेनार्जितं भुज्यमानं तत्क्षीयते
इति .... तत्क्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया पारापारमुच्य
ते एवं शब्दादिभोगाभ्यासात् प्रवर्द्धंते कामाः तेच विषयाप्राप्तौ कामिनं दुःखाकुर्व
न्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुमाभं उच्यते एवं ना
पवंराद्विनमविधनं कालेन हीयत इति भावयतो या तुष्टिः सा पंचमी उत्तमाम्भ उच्यते

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः दानं च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रि
विधः ५१ ३

सां० ख्य० कौ० नुपहत्य भूतानि विषयोपभोगः संभवतीति हिंसादोषदर्शनाद्विषयोपरमे यानुष्टिः सा

३८ पंचमी उत्तमोऽम्भ उच्यते एवमाध्यात्मिकाभिश्चतस्रभिर्बाह्याभिः पंचभिः नव तुष्ट

५० योऽभिमताः गौणमुख्यभेदात् सिद्धीराह ॥ विहन्यमानस्य दुःखस्य त्रित्वात्त

द्विघातास्त्रय इति इमा मुख्यास्तिस्रः सिद्धयस्तदुपायतया चेतरा गौण्याः पंच

सिद्धयः ता अपि हेतुहेतुमत्तया स्थिताः तत्राद्याध्ययनलक्षणा सिद्धिर्हेतुरेव

मुख्यास्तु सिद्धयो हेतुमत्य एव मध्यमास्तु हेतुहेतुमत्यः विधिवद् गुरुमुखा

दध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमा सिद्धिस्तारमुच्यते तत्का

र्यः शब्दः शब्द इति शब्दजनितमर्थज्ञानमुपलक्षयति कार्ये कारणोपचारात् सा

द्वितीया सिद्धिः सुतारमुच्यते तदिदं द्विधा श्रवणम् ऊहस्तर्कः आगमाविरोधि ३४

न्यायेनागमार्थपरीक्षणं संशयपूर्वपक्षनिराकरणेनोत्तरपक्षस्थापनं तदि

दमननमाचक्षतेआगमिनः सात्तनीया सिद्धिस्तारतार मुच्यते सुहृत्प्राप्तिर्या
येन परीक्षितमप्यर्थं न श्रद्दधते तेन्यावद्गुरुशिष्यसब्रह्मचारिभिः सह संवाद्यते अ
तः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिश्च
तुर्थी रम्यक उच्यते दानं च शुद्धिर्विवेकज्ञानस्य दैपशोधने इत्यस्माद्धातोर्दानपद
व्युत्पत्तेः यदाहात्र भगवान्पतंजलिः विवेकख्यातिरविप्लवा दुःखत्रयस्य हानोपाय
इति अविप्लवः शुद्धिः सा च सवासनसंशयविपर्ययाणां परिहारेण विवेकसाक्षा
त्कारस्य स्वच्छप्रवाहे वस्थानं सा च न विना दरनैरन्तर्यदीर्घकालसेविताभ्यासपरिपाका
द्भवतीति दानेन विवेकख्यातिकार्येण सोपि संगृहीतः सेयं पञ्चमी सिद्धिः सदामुदि
तमुच्यते इति सम्यग्मुख्यासिद्धयः प्रमोदमुदितमोदमानाः स्त्यष्टौ सिद्धयः अन्ये त्वाचक्षते उ
पदेशादि नाप्रागभवीयाभ्यासवशात्तत्त्वस्य स्वयमूहनं सा सिद्धिरूहः यस्य सांख्यशास्त्र

२ ^यस्य शिष्याचार्य सम्बन्धेन सांख्यंप्राप्तं ग्रन्थतोऽर्थतश्चा [illegible] ध्ययने सा अध्ययनहेतुका

सां०कौ० पाठ मन्यदीयमाकर्ण्य तत्वज्ञानमुत्पद्यते सा सिद्धिः शब्द पाठानंतर भाविता त्वात्

^यस्याधिगततत्वं सुहृदं प्राप्य ज्ञानमुत्पद्यते सा ज्ञानलक्षणा सिद्धिः [illegible] सुहृत्प्राप्तिः

३५ दानं च सिद्धिहेतुर्धनादिदानेनाराधितो ज्ञानी ज्ञानं प्रयच्छति अस्य च युक्तत्वं सूरिभिरे

वावगंतव्य इति कृतं पर दोषो द्भावनेन सिद्धांतमात्रप्रवृत्तानामिति सिद्धितुष्टिविप

र्ययेणाशक्तिर्बुद्धिवधः सप्तदशधा द्रष्टव्यः अत्र प्रत्यये सिद्धिरुपादेयेति प्रसि

द्धमेव तन्निराकरणहेतु वस्तुविपर्ययाशक्तितुष्टयो हेया इत्याह सिद्धेः पूर्वाकु

शास्त्रिविधः पूर्वा इति विपर्ययाशक्तितुष्टयः परा मदशनिताः सिद्धिकरेणी नामं कुशा

निवारकत्वात् अतः सिद्धिपरिपंथित्वाद्विपर्ययाशक्तितुष्टयो हेया इत्यर्थः ५१

नविना भावैर्लिंगं न विना लिंगेन भावनिष्पत्तिः लिंगाख्यो भावाख्यस्तस्माद्विधः प्रव

र्तते सर्गः ५२ स्यादेतत्पुरुषार्थप्रयुक्ता सृष्टिः स च पुरुषार्थः प्रत्यय सर्गाद्वा तन्मा ३५

दं उ प्राण वेति २

त्रसर्गाद्वासिध्यतीतिक्तमुभयसर्गेणेत्यत आह॥ लिंगमितितन्मात्रसर्गेसुयत्लक्ष
यति भावैरितिप्रत्ययसर्गेण तदुक्तं भवति तन्मात्रसर्गस्यपुरुषार्थसाधनत्वंस्व
रूपंचन प्रत्ययसर्गाद्विनाभवति एवं प्रत्ययसर्गस्यस्वरूपंच पुरुषार्थसाध
नत्वंचतन्मात्राहृतेइत्युभययथासर्गप्रवृत्तिः भोगः पुरुषार्थोनभोग्यान् शब्दादी
न् भोगायतनंचशरीरद्वयमंतरेणसंभवतीतिउपपन्नस्तन्मात्रसर्गः एवंस
एव भोगो भोगसाधनानीन्द्रियाणिचांतःकरणानिचांतरेणनसंभवन्तिनच
नचा४ तानिधर्मादीन्भावान्विनापवर्गहेतुर्विवेकख्यातिरूपपसर्गेविनाइत्युपप
न्नं भयविधः सर्गः अनादित्वाच्चबीजांकुरवन्नान्योन्याश्रयदोषमावहतिक।
त्पादावपिप्राचीनकल्पोत्पन्नभावलिंगसंस्कारवशंलिंगयोरुत्पत्तिर्नानुपपन्ने भावर
तिसर्वमवदातं॥ विभक्तः प्रत्ययसर्गस्तन्मात्रसर्गविभजने अष्टविकल्पो

सां०कौ० दैवसर्गस्तैर्यग्योन्यश्च पंचधा भवति मानुषश्चैकविधः समासतो भौतिकः स
३६ र्गः ५३ अष्टविकल्पो दैवसर्गः अष्टविधो देवसर्गः ब्राह्मप्राजापत्यऐंद्रः पैत्रः गां
धर्वः याक्षः राक्षसः पैशाचइत्यष्टविधो दैवसर्गः तैर्यग्योन्यश्च पंचधा
भवति पशुमृगपक्षीसरीसृपस्थावराः मानुषश्चैकविधः ब्राह्मणत्वाद्य
36 वांतरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषादिति समास
तः संक्षेपतः भौतिकः सर्गो घटादयस्त्वशरीरत्वेपि स्थावरा एवेति भौतिकस्या
स्य सर्गस्य चैतन्योत्कर्षनिकर्षतारतम्याभ्यां मूर्ध्वाधोमध्यमत्वेन त्रैविध्यमा
ह ५३ ऊर्ध्वं सत्वविशालस्तमोविशालश्च मूलतः सर्गः मध्ये रजोविशालो
ब्रह्मादिस्तंबपर्यंतः ५४ ऊर्ध्वं सत्वविशालो द्युप्रभृतिसत्यांतो लोकः सत्वबहु ३६
लः ब्राह्मप्राजापत्यऐंद्रपैत्र्यगांधर्वयाक्षराक्षसपैशाच इत्यष्टविधो दैवसर्गः

नमोविशालश्चमूलतः सर्गः पश्वादिः स्थावरांतः सोयंमोहमपत्वात्तमोवहुलः भू
र्लोकस्तुराष्ट्रदीपसमुद्रसन्निवेशोमध्येरजोविशालोधर्माधर्मानुष्ठानपरत्वाद्दुः
खवहुलत्वाच्चइमांलोकसंस्थितिंसंक्षिपेयतिब्रह्मादिस्तंवपर्यंतस्तंवग्रहणेवृक्षा
दयःसंगृहीताः नदेवंसर्गदर्शपित्वातस्यापवर्गसाधनवैराग्योपयोगिनींदुःख
हेतुतामाह ५४ तत्रजरामरणकृतंदुःखंप्राप्नोतिचेतनःपुरुषःलिंगस्याविनिवृत्ते
स्तस्माद्दुःखंस्वभावेन ५५ तत्रशरीरादेरुपद्यपिविविधविचित्रानंदभोगभागि
नःप्राणभृद्भेदास्तथापिसर्वेषांजरामरणकृतंदुःखमपरिहार्यंसर्वस्यखलुम
रणत्रासोमानभूवंभूयासमित्येवमात्मिकोस्तिदुःखंचभयहेतुरितिदुःखं
मरणंस्यादेतत्तदुःखादयःप्राकृतावुद्धिगुणाः तत्कथंएतेचेतनसंबंधिनो
भवंत्यतआहपुरुषइतिपुरिलिंगेशेतेइतिपुरुषः लिंगंचतत्संवंधीतिचेतनो

सां॰कौ॰ पित्तसंबंधी भवतीत्यर्थः कुतः पुनर्लिंगसंबंधिदुःखं पुरुषस्य चेतनस्येत्यत आ
३९ हलिंगस्याविनिवृत्तेः पुरुषाभेदाग्रहाल्लिंगधर्मानात्मन्येवाध्य वस्यति
व पुरुषः अथवा दुःखस्वभावावधिराज्ञा कथ्यते लिंगं यावन्न निवर्त्तते तावदिति ५५
उक्तस्य सर्गस्य कारणविप्रतिपत्तिं निराकरोति ५५ इत्येष प्रकृतिकृतो महदा
३७ दिविशेषभूतपर्यंतः प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः ५६ आर
भ्यते इत्यारंभः सर्गः प्रकृत्यैव कृतो नेश्वरेण नाप्यकारणः अकार
णत्वे हि अत्यंतमभावो भावोत्यंतभावो वा स्यात् न ब्रह्मोपादानः चितिशक्ते
रपरिणामात् नेश्वराधिष्ठितप्रकृतिकृतो निर्व्या पारस्याधिष्ठातृत्वासं
भवात् नहि निर्व्यापारस्तक्षा वास्याद्यधितिष्ठति ननु प्रकृतिकृतश्चेत्तस्या नि र ३७
त्यायाः प्रवृत्तिशीलाया अनुपरमात्सदैव सर्गः स्यादिति न कश्चिन्मुच्येतेत्यत आ

वै

ह प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरंभः [illegible] यथोदनकाम ओदनाय
पाके प्रवृत्त ओदनसिद्धौ निवर्त्तते एवं प्रत्येकं पुरुषान्मोचयितुं प्रवृत्ता प्रकृतिर्यं पुरु यं
नं षं मोचयति प्रकृतिस्तं प्रति पुनर्न प्रवर्त्तते तदिदमाह स्वार्थ इव स्वार्थे यथा तथा
५६ परार्थे आरंभ इत्यर्थः स्यादेतत्स्वार्थं परार्थं वा चेतनः प्रवर्त्तते न च प्रकृतिरचेतनैवं मिमत्य
प्रवर्त्तितुमर्हतीति तस्मादस्ति प्रकृतेरधिष्ठाता चेतनः न क्षेत्रज्ञाश्चेतना अपि प्रकृतिम
धिष्ठातुमर्हन्तीति तेषां प्रकृतिस्वरूपानभिज्ञत्वात् तस्मादस्ति सर्वार्थदर्शी प्रकृतेरधि
ष्ठाता सर्वेश्वर इत्यत आह ५६ [illegible]
वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधा
नस्य ५७ दृष्टमचेतनमपि प्रयोजने प्रवर्त्तमानं यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं
प्रवर्त्तते एवं प्रकृतिरचेतना पुरुषमोक्षणाय प्रवर्त्तीयिष्यते नैवं क्षीरप्रवृत्तेरपीश्व
नै

सां॰कौ॰ राधिष्ठाननिवंधनत्वेनसाध्यत्वात्साध्येनव्यभिचारइतिसांप्रतंप्रेक्षावतः प्रवृत्तेः
५८ स्वार्थकारुण्याभ्यांव्याप्तत्वात्तेचजगत्सर्गाद्व्यावर्त्तमानेप्रेक्षावत्प्रवृत्तिपूर्वकत्वम
पिनिवर्त्तयतः सदाप्तकामस्यभगवतोजगदसृजतः किमप्यभिलषितंनभ
वतिनापिकारुण्यादस्यसर्गेप्रवृत्तिः प्राक्सर्गाज्जीवानामिंद्रियशरीरविषयानु
यातत त्पत्तौदुःखाभावेनकस्यप्रहाणेच्छाकारुण्यंसर्गोत्तरकालेदुःखिनोवलोक्यकारु
क ण्याभ्युपगमेतदुत्तरमितिरेतराश्रयत्वं दूषणंकारुण्येनसृष्टिः सृष्ट्याचका
रुण्यमितिअपिचकरुणयाप्रवृत्तईश्वरः सुखिनएवजंतून्सृजेन्नविचित्रान्
कर्मवैचित्र्याद्वैचित्र्यमितिचेत्कृतमनेनप्रेक्षावताकर्माधिष्ठानेनतदनधिष्ठा
नमात्रादेवअचेतनस्यापिकर्मणः प्रवृत्त्यनुपपत्तेस्तत्कार्यशरीरेंद्रियविषया ३८
नुत्पत्तौदुःखानुत्पत्तेरपिसुकरत्वात्प्रकृतेस्त्वचेतनायाः प्रवृत्तेर्नस्वार्थानुग्र

[redacted]होकारु एवं प्रयोजकमिति नोक्तप्रसंगावतारः परार्थमात्रं तु प्रयोजक
मुपपद्यते तस्मात्सुष्ठूक्तं वत्सविवृद्धिनिमित्तमिति स्वार्थं वेति दृष्टांतिनं तद्वि
भजते ५७ औत्सुक्यं इच्छा सा खल्विष्यमाणार्थ+ औत्सुक्यनिवृत्यर्थं यथा क्रि
यासु प्रवर्त्तते लोकः पुरुषस्य विमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं ५८ + प्रोनिव
र्त्ततेइष्यमाणश्च स्वार्थः इष्टलक्षणत्वात्फलस्य दृष्टांतिके योजयति पुरुष
स्याविमोक्षार्थं प्रवर्त्तते तद्वदव्यक्तं ननु भवतु पुरुषार्थः प्रकृतेः प्रवर्त्तं कोनिवृ
त्तिस्तु कुतः स्यात् प्रकृतेरित्यत आह रंगस्य दर्शयित्वा यथा निवर्त्तते नर्त्त
की नृत्यात्पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिः ५९ रंगस्येति स्था
नेन स्थानिनः पारिषदाननुपलक्षयति आत्मानं पुरुषभेदेन च प्रकाश्य स्वर्थः शब्दाद्यात्मना
स्यादेतत्प्रवर्त्तनां प्रकृतिः पुरुषार्थं पुरुषादुपकृता प्रकृतिले तेकं वि

रङ्गःस्थानिनः पस्म

निर्गुणत्वादेव

गै २ भे १

सां॰ को॰ दुपकारं आज्ञासंपादनाराधितादिवाज्ञापयितुं भुंजिष्यातन्याच्च न परार्थोस्या
३९ रं भइत्यत आह नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः गुण
[illegible] वत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति ६० यथा गुणवाननुपका
र्योपि भृत्यो निर्गुणेऽनुपकारिणि स्वामिनि निष्फलाराधनः एवमियं प्रकृ नि
तिः तपस्विनी गुणवत्युपकारिण्यनुपकारिणि स्वामिनि निर्गुणे पुरुषे व्यर्थ
य परिश्रमेति पुरुषार्थमेव प्रवर्तनेन स्वार्थमिति सिद्धं स्यादेतत् नर्तकीनत्संपा
रिषद्भ्यो दर्शयित्वा निवृत्तापि पुनस्तद्दृष्टिकौतूहलात्प्रवर्तते यथा प्रकृति तया
रपि पुरुषायात्मानं दर्शयित्वा निवृत्तापि पुनः प्रवर्तस्यतीत्यत आह प्रकृ
तेः सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति या दृष्टास्मीति पुनर्न दर्श ३९
नमुपैति पुरुषस्य ६१ सुकुमारतरतातिपेशलतापरपुरुषदर्शनासहि

स्युतेतियावत् असूर्यंपश्यादिकुलवधूइतिमंदाक्ष्यमंथराप्रमादादिगलितासिरो
चलाचेष्टालोकृतेपरपुरुषेणतदासौऽप्रयतते [illegible] अप्रमत्तायथैनांपरपुरुषां
नराणांनपुनःपश्यंति एवंप्रकृतिरपिकुलवधूतोप्यधिकादृष्टाविवेकेननपुनः
ईक्ष्यतइत्यर्थः स्यादेतत्पुरुषश्चेद् गुणो परिणामीकथमस्यमोक्षः मुचेर्बंधन
विश्लेषार्थत्वात्सवासनक्लेशकर्माशयानांचबंधनसंज्ञितानांपुरुषे परिणा
मिन्यसंभवात् अतएवास्यनसंसारःप्रेत्यभावाऽपरनामास्तिनिःक्रियात्वात् तस्मात्पु
रुषविमोक्षार्थमितिरिक्तंवचइतीमांशंकामुपसंहारव्याजेनाभ्युपगच्छन्नपाकरो
ति ६१ तस्मान्ननिबध्यते नापि मुच्यते नापिसंसरतिकश्चित्संसरति
बध्यतेमुच्यतेचनानाश्रयाप्रकृतिः ६२ तस्मान्ननिबध्यते नापिमुच्यते नापिसंस
रतिकश्चित्कस्तर्हीत्यतआहसंसरतिबध्यतेइतिअज्ञानकश्चित्पुरुषोबध्यतेन

सां. कौ. कश्चित्संसरति न कश्चिन्मुच्यते प्रकृतिरेव नानाश्रया सती बध्यते च संसरति मुच्यते
४० चेति बंधमोक्षसंसाराः पुरुषेमूपचर्यंते यथा जयपराजयौ भृत्यगतावपि स्वामि
न्युपचर्यंते तदाश्रयेण भृत्यानां तद्भागित्वात्तत्फलस्य च शोकलाभादेः स्वामिनि
संबंधाद्भोगापवर्गयोः प्रकृतिगतयोरपि विवेकाग्रहात्पुरुषसंबंध उपपादि
त तइति सर्वं पुष्कलं ननु च गतं प्रकृतिगता बंधसंसारापवर्गाः पुरुषे उपचर्यंत इति
प्रकृतेरि किंसाधना पुनरेते इत्यत आह ६२ रूपैः सप्तभिरेव तु बध्नात्यात्मानमात्मना प्र
कृतिः सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ६३ तत्त्वज्ञानवर्जं च धर्मा
धर्मादिभिः सप्तभीरूपैरिति पुरुषार्थं प्रति आत्मानं आत्मनैकरूपेण तत्त्वज्ञा
नेन विवेकख्यात्या मोचयति पुनर्भोगापवर्गौ न करोतीत्यर्थः अवगतमीदृशं ४०
तत्त्वं ततः किमित्यत आह ६४ एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषं अविपर्य

भोगापवर्गौ प्रति

याद्विशुद्धं केवलमुत्पद्यते ज्ञानं ६७ तत्वेनविषयेणाविषयीज्ञानमुपलक्ष्यतेउक्तंकार
तत्वज्ञानाभ्यासादादरनैरंतर्यदीर्घकालसेवितात्तत्वपुरुषान्य[illegible]तासाक्षात्कारिज्ञा
नमुत्पद्यते यद्विषयश्चाभ्याससत्तद्विषयमेवसाक्षात्कारमुपजनयतितत्वविषय
श्चाभ्यासइतितत्वसाक्षात्कारंजनयति अतउक्तं विशुद्धमितिकुतो विशुद्धमित्य
त आह। अविपर्ययादितिसंशयविपर्ययौहिज्ञानस्याशुद्धीतद्रहितंविशुद्धंत
दिदमुक्तमविपर्ययादितिनियतमविपर्ययनतयाग्रहणंसंशयोपि[illegible]तेनावि
र्ये पर्ययग्रहणेनाविपर्ययादितिसंशयविपर्ययाभावोदर्शितः तत्वविषयत्वात्संशय च
विपर्ययाभावः स्यादेतत्तरुत्पद्यतामीदृशाभ्यासात्तत्वज्ञानंतथाप्यनादि[illegible]
[illegible]मिथ्याज्ञानसंस्कारेणमिथ्याज्ञानंजनयितव्यंतथाचतन्निवंधस्यसंसा
रस्यानुच्छेदप्रसंगइत्यतउक्तंकेवलमितिविपर्ययेणाऽसंभिन्नांयद्यप्यनादिवि

संप्र

लौकिका: २

सां·कौ· पर्ययवासनातथापितत्वज्ञानवासनया तत्वसाक्षात्कारमादधत्यादि म[illegible]त्याविश
६९ क्यासमुच्छेत्तुं तत्वपक्षपातो हि धियां स्वभावः यथा हुर्वीह्यापि निरुपद्रव भूता
र्थे स्वभावस्य विपर्ययैः न बाधो यत्नवत्वेपि बुद्धेस्तत्पक्षपातत इति ज्ञानस्वरूपमु
क्तं नास्मि न मे नाहमिति नास्मीत्यात्मनि क्रियामात्रं निषेधति यथाहुः कृभ्वस्तयः
क्रियासामान्यवचना इति तथा चाध्यवसायाभिमानसंकल्पालोचनानि चान्तराणि
बाह्याश्च सर्वे व्यापारा आत्मनि प्रतिषिद्धा निवो[illegible]ध्यानियतश्चात्मनि व्यापारावेशो
नास्त्यतो नाहमहमिति कर्तृपमहं जानामि अहं जुहोमि अहं ददेऽहं भुंजे इति स
र्वत्र कर्तुः परामर्शो निष्क्रियत्वे च सर्वत्र कर्तृत्वाभावः ततः सुष्टूक्तं नाहमिति अत
एव न मे कर्त्ता हि स्वामितां लभते न[illegible]भावात्कुतो[illegible]भाविका स्वामितेत्यर्थः अथवा
नासीति पुरुषोऽस्मि न प्रसवधर्मा अप्रसवधर्मत्वाच्चाकर्तृत्वमाहन्नाहमिति अ ५१

कर्त्तृत्वाच्चनस्वामित्यतआहनमेइतिनन्वेतावत्तुज्ञानेप्यपिकश्चित्कादाचिदज्ञा
तोविषयोस्तितज्ज्ञानंजन्तून्बंधयिष्यतीत्यतआहअपरिशेषमितिनास्तिकिं
चिदस्मिन्परिशिष्टंज्ञातव्यंयदज्ञानंबंधयिष्यतीत्यर्थः ६४ तेननिवृत्तप्रसवा
मर्थवशात्सप्तरूपविनिवृत्तांप्रकृतिंपश्यतिपुरुषःप्रेक्षकवदवस्थितःस्वस्थः
६५ किंपुनरीदृशेनतत्वसाक्षात्कारेणसिध्यतीत्यतआहभोगविवेकसाक्षात्का
रौहिप्रकृतेःप्रसोतव्यौतौचप्रसूताविति नास्याःप्रसोतव्यमवशिष्यतेयत्प्रसो-
तेष्यतिनिवृत्तप्रसवाप्रकृतिःविवेकज्ञानरूपोयोर्थस्तस्यवशःसामर्थ्यंतस्मा
दतत्वज्ञानपूर्वकाणिखलुधर्माधर्माज्ञानवैराग्यैश्वर्यानैश्वर्याणिवैराग्य
मपितौष्टिकानामतत्वज्ञानपूर्वकमेवतत्रतत्वज्ञानंविरोधित्वेनातत्वज्ञानमु-
च्छिनत्तिकारणनिवृत्त्याचसप्तरूपाणिनिवर्त्तन्तइतिसप्तरूपनिवृत्ताप्रकृतिः अ

कां·सो· वस्थितइतिनिःक्रियःस्वच्छःइतिरजस्तमोभ्यामकलुषयाबुद्ध्यासंभिन्नःसात्विक्या
८५ तुबुद्ध्यातदाप्यस्यमनाक्संभेदोस्तिअतएवैवंभूतप्रकृतिदर्शनानुपपत्तेरितिस्या ६५
देतत्निवृत्तप्रसवामितिनमृष्यामहेसंयोगकृतोहिसर्गइत्युक्तंयोग्यताचसं॥
योगःभोक्तृत्वयोग्यताचपुरुषस्यचैतन्यंभोग्यत्वयोग्यताचप्रकृतेर्जडत्वंविष
यत्वंचनचैतयोरस्तिनिवृत्तिःनचकरणीयाऽभावान्निवृत्तिःतज्जातीयस्यान्यस्य
करणीयत्वात्पुनःपुनःशब्दाद्युपभोगवदित्यतआह दृष्टामयेत्युपेक्षकए
कोदृष्टाहमित्युपरमत्यन्यासतिसंयोगेपितयोःप्रयोजनंनास्तिसर्गस्य ६६
करोतुनामयोनःपुण्येनशब्दाद्युपभोगंप्रकृतिर्ययाविवेकख्यातिर्नकृतेतिकृत
विवेकख्यातिस्तुनशब्दाद्युपभोगंजनयतिअविवेकख्यातिनिबंधनोहितदुप ८२
भोगोनिबंधनाभावेनभवितुमर्हतिअंकुरइवबीजाभावेप्राकृतास्सुखदुःखमो

हात्मनःशद्वादीनस्तदविवेकान्ममेतदित्यभिमन्यमानआत्माभुंजीतएवंवि
वेकख्यातिमपिप्राकृतीमविवेकादेवात्मामदर्थेयमितिमन्यतेउत्पन्नविवे-
कख्यातिस्तुतदसंसर्गात्शद्वादीन्नोपभोक्तुमर्हतीतिनापिविवेकख्यातिंप्राकृ
तीं ततोविविक्तआत्मानस्वार्थमभिमंतुमर्हतिपुरुषार्थौचभोगविवेकौप्रकृ
त्यारंभप्रयोजकावितिअपुरुषार्थौसंतौनप्रकृतिंप्रयोजयतःतदिदमुक्तंप्रयो
जनंनास्तिसर्गस्येतिप्रयुज्यतेहिसर्गेप्रकृतिरनेनेतिप्रयोजनंपुरुषार्थस्त-
न्नास्तीत्यर्थःस्यादेतत्उत्पन्नतत्वसाक्षात्कारोमुक्तश्चेदनंतरंमुक्तस्यतस्यदेह
प्रकृतिं पातःस्यादितिकथमदेहः [illegible] पश्येत्अथतत्वज्ञानेपिनमुच्यतेकर्मणाम
[illegible] प्रक्षीणत्वात्तेषांकुतःप्रक्षयःभोगादितिचेत्हंतभोनतत्वज्ञानं
मोक्षसाधनमितिव्यक्ताव्यक्तज्ञविज्ञानात्तत्वज्ञानेनापवर्गइतिरिक्तंवचः

सां०कौ० भोगेनचापरिसंख्येयः कर्माशय [illegible] :प्रचयो अनियतविपाककालः क्षेत

५५ व्यः ततश्चापवर्गप्राप्तिरित्यपिमनोरथमात्रमित्यतआह सम्यक्ज्ञानाधि

गमाद्धर्मादीनामकारणप्राप्तौ तिष्ठतिसंस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः ॥

६७ तत्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोपिकर्माशयप्र

चयः दग्धवीजभावतयाजात्यायुर्भोगलक्षणायफलायकल्पतेक्लेशसलिला

वसिक्तायांहिबुद्धिभूमौकर्मवीजान्यंकुरंप्रसुवतेतत्वज्ञाननिदाघनिपीतस

कलक्लेशसलिलायांमूखरायांकुतः कर्मवीजानामंकुरप्रसवः तदिदमु

क्तंधर्मादीनामकारणप्राप्ताविति अकारणत्वप्राप्तावित्यर्थः ६७ प्राप्तेशरीर

भेदेचरितार्थत्वात्प्रधानविनिवृत्तौऐकांतिकमात्यंतिकमुभयंकैवल्यमाप्नो ५३

ति ६८ उत्पन्नतत्वज्ञानोपिचसंस्कारवशात्तिष्ठतियथोपरतेकुलालव्यापा

प्राप्ते शरीरभेद इति ६८

रेव चक्रे वेगाख्यसंस्कारवशाद्भ्रमति स्थितिकालपरिपाकवशात्तूपरते संस्कारे निःक्रियं भ
वति शरीरस्थितौ च प्रारब्धपरिपाको धर्माधर्मौ संस्कारः तथा च श्रुतिः भोगेना
त्वितरे क्षपयित्वा अथ संपत्स्य इति तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सं
ख पत्स्य इति प्रक्षीयमाणाविद्यासंस्कारावशेषश्च संस्कारस्तद्वशात्तत्सामर्थ्याद्धृत
शरीरोऽस्ति [illegible] तिष्ठति स्यादेतत् यदि संस्कारशेषादपि धृतशरीरस्तथापि कदास्य मो
क्षो भविष्यतीत्यत आह अनारब्धविपाकानां तावत्कर्माशयानां तत्त्वज्ञानाग्निना
बीजभावो दग्धः प्रारब्धविपाकानां तु उपभोगेन क्षये सति प्राप्ते शरीरभेदे विना
शे चरितार्थत्वात्कृतप्रयोजनत्वात्प्रधानस्य तं पुरुषं प्रति निवृत्तौ ऐकान्तिकमव
श्यंभावि मात्यन्तिकम विनाशात् उभयं कैवल्यं दुःखत्रयविगमं प्राप्नोति पुरुषः ६८
पुरुषार्थज्ञानमिदं गुह्यं परमर्षिणा समाख्यातं स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूता

प   त्व   परमार्थ इति २

सां० कौ० नां ६९ प्रमाणेत्यादिनेष्वत्यं तत्प्रद्धोत्पादनाय परमर्षिपूर्वकमाह गुह्यं गुहानिवा
५५ सिस्थूलधियां दुर्वोधमिति पावनत्परमर्षिणा कपिलेन तामेव श्रद्धामागमिकत्वे
न दृढयति स्थित्युत्पत्तिरिय यत्र ज्ञाने पदार्थे [illegible] चर्मेणिहापि नंहंमाति वतु भूता
55 नां प्राणिनां स्थित्युत्पत्तिप्रलया आगमे चिंत्यंते ६९ एतत्पवित्रमग्र्यं मुनिरासु
रयेनुकंपया प्रददौ आसुरिरपियंचशिखाय तेन च बहुधा कृतंतंत्रं ७० शिष्य
परंपरयागतमीश्वरकृष्णेन चैतदार्याभिः संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सि
तेऽर्थाः द्धांतं ७१ सप्तत्यां किल येर्थाः कृत्स्नस्य षष्टितंत्रस्य आख्यायिकाविरहिताः प र
रवादविवर्जिताश्चापि ७२ इति सांख्यकौमुदी समाप्ता ॥ स्यादेतत् यत्र परम
र्षिणा साक्षात्कथितं तच्छ्रद्धीहि यत्तु नरा ईश्वरकृष्णेन कथितं तत्कुतः श्रद्धेत्य नं
त आह एतत्पवित्रं पावनं दुःखत्रयहेतोः पाप्मनः पुनाति अग्र्यं सर्वेभ्यः पवि ४४

म

घाता

सप्तत्यामिति २

त्रेभ्यो मुख्यं मुनिं कपिलः आराध्य तत्त्वेभ्य इत्यार्या इति आर्या मिति यस्यासौ यथार्य
७१ मति। एतच्च शास्त्रं सकलशास्त्रार्थसूचकत्वान्न तु प्रकरणमित्यत आह तथा च
भोज राजवार्त्तिकं प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता पारार्थ्यं च तथानैक्यं वि
योगो योग एव च शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश विपर्ययः पंचविधस्त स.
थोक्ता नव तुष्टयः करणानामसामर्थ्यमष्टाविंशतिधा मतं इति षष्टिः पदार्थाना
रिति मष्टभिः सह सिद्धिभिः सषष्टिः पदार्था कथिते ति सकलशास्त्रार्थकथना
न्नेदं प्रकरणमपि तु शास्त्रमेवेदमिति सिद्धं एकत्वमर्थवत्त्वं पारार्थ्यं च प्रधान
मधिकृत्योक्तं अन्यत्वमकर्तृत्वं बहुत्वं चेति पुरुषमधिकृत्य अस्तित्वं योगो वि
योगश्चेत्युभयमधिकृत्य स्थितिरिति स्थूलसूक्ष्ममधिकृत्य मनांसि कुमुदानीव त
बोधयन्ती सतां सदा श्रीवाचस्पतिमिश्राणां कृतिः स्यात्तत्त्वकौमुदी ७२ इति १४

महामहोपाध्याय

सां कौ० श्रीवाचस्पतिमिश्राचार्यविरचिता सांख्यतत्त्वकौमुदी समाप्ता ॥०॥१॥०॥

६५